This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 39 वर्गांक वेद
नांव - सायंप्रातर ग्निहोत्र होम
लेखक/लिपीकार .... पृष्ठ 9६
काळ शके १८००... पूर्ण/~~अपूर्ण~~ ....

कविकुलगुरु कालिदास सं[स्]कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 32 वर्गांक धर्मशास्त्र
नांव - एकादशी विहितानि दानानि ....
लेखक/लिपीकार .... पृष्ठ ३१
काळ .... पूर्ण/~~अपूर्ण~~ ....

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 33 वर्गांक ....
नांव - कालनिर्णय ...... (वैद्यनाथभट्ट लिपिक)
लेखक/लिपीकार माधवाचार्य कृत ...... पृष्ठ २४
काळ .... पूर्ण/~~अपूर्ण~~ ....

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ३४ वर्गांक धर्मशास्त्र
नांव - अशौच निर्णय ....
लेखक/लिपीकार त्र्यंबक पंडित कृत.. पृष्ठ ३
काळ संवत १९८४ पूर्ण/~~अपूर्ण~~ ....

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ नत्वा गजाननं देवमगजानंदवर्धनं॥ कालमाधवपद्यानि विवरिष्ये यथामति॥१॥ विघ्नविघातायमंगलमा
रचयति॥ वागीशेति॥ सुमनसो देवाः सर्वार्थानां सर्वपुरुषार्थसाधनानां उपक्रमे आरंभे इदानीं गुरुदेवतयोः स्मरणमारच
॥१॥ यति॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति स्मरणात्॥ सोहमिति॥ सोहं
माधवाचार्यनामा विवेकस्य पदवीं मार्गं प्राप्य हृदि अव्याहतं श्रीकंठं महादेवं भजे ध्यायामीत्यर्थः॥ कीदृशोहं आम्नायो वेदस्तद्रूप
इत्यर्थः परं केवलं मज्जन् स्नानं कुर्वन् तदेकपरायण इत्यर्थः॥ तथा सज्जनसंगरूपेण तीर्थेन निपुणः॥ निर्णीतशास्त्रतत्वः॥

॥वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥१॥ सोहं प्राप्य विवेकतीर्थ
पदवीमाम्नायतीर्थे परं मज्जन्सज्जनसंगतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन्॥ लब्ध्वामाकलयन्प्रवाहलहरीं श्री
भारतीतीर्थतो विद्यातीर्थमुपाश्रयन्हृदि भजे श्रीकंठमव्याहतं॥२॥

तथा सद्वृत्तं साधूनामाचरणं तदेव तीर्थं श्रयन् आश्रयन् तथा श्रीभारतीतीर्थतः एतन्नामकाद्गुरोः सकाशात् लब्ध्वा प्रभा
वलहरीं देवताप्रसादरूपां लहरीं आकलयन् प्राप्नुवन्नित्येकोर्थः॥ भारतीरूपात्तीर्थाद्गुरुलब्ध्वां प्रभाववलहरीं पांडित्यरूपामाक ॥१॥
लयन्नित्यपरः॥ तथा विद्या ब्रह्मविद्या तद्रूपं तीर्थम् उपाश्रयन् सेव्यमान इत्यर्थः॥ एतस्यैव विद्यारण्य इति नाम प्रसिद्धं॥१॥

धर्मप्रवर्तकं स्वदेशाधिपतिं वर्णयति॥ सत्यैकेति॥ श्रीमान् बुक्कणनामा क्ष्मापतिः राजा विजयते कीदृशः सत्यरूपं पदमेकं मुख्यं व्रतं
तस्य पालकः॥ तथा द्विगुणधीः इतरापेक्षया द्विगुणबुद्धिमानित्यर्थः॥ अथवा द्वौ गुणौ सत्वरजोरूपौ यस्याः तादृशी धीर्यस्य न तु तमो
या३ गुणशालिनीत्यर्थः॥ त्रीन्धर्मार्थकामान् अर्थयते प्रार्थयते तच्छीलः अथवा तिस्रः प्रभावोत्साहमंत्रजाः शक्तीरर्थयते तच्छील इति
तथा चतुर्णां वेदानां सामाद्युपायानां वा वेदिता ज्ञाता तथा पंचसु स्कंधेषु तन्नामकेषु सहायादिपदार्थेषु कृती कुशलः॥ तदुक्तं
नीतिशास्त्रे सहायाः साधनोपायाः विभागो देशकालयोः॥ विनिपातप्रतीकारः सिद्धिः पंचांगमिष्यत इति॥ अस्यार्थः॥ सहायाः रा

सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थी चतुर्वेदिता पंचस्कंधकृती षडन्वयदृढः सप्तांगसर्वंसहः॥ अष्टव्य
क्तिकलाधरो नवनिधिः पुष्यद्दशाप्रसयः स्मार्ताध्वधुरंधरो विजयते श्रीबुक्कणक्ष्मापतिः॥३॥

जकार्ये मंत्री सैनिकाद्याः तथा कार्यस्य साधने उपायाः सामाद्यः तथा देशकालयोर्विभागे व्यवस्था॥ अस्मिन्देशे अस्मिन्काले अय
मुपाय इत्येवंरूपा तथा विनिपातस्य राष्ट्ररोगस्य उत्पातादिरूपस्य प्रतीकारः निराकरणम् तथा सिद्धिः इष्टलाभः एते पंचस्कंधाः
राज्यांगमित्यर्थः॥ पुनः कीदृशो राजा षडन्वयदृढः षण्णां गुणानां अन्वयेन संबंधेन दृढः॥ अजेय इत्यर्थः षण्णां शास्त्राणामित्येके अर्थांतरं
पुनः कीदृक् सप्तभिरंगैः सर्वसहनशीलः॥ तानि च स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि चेति नीतिशास्त्रोक्तानि ज्ञेयानि॥
तथा अष्टौ व्यक्तयो मूर्तयो यस्य तादृशस्य शिवस्य कलाः अंशस्य धारकः॥ ताश्च मूर्तयः जलाग्नियजमानचंद्रसूर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥के॥ [illegible]

काशपृथिवीवायुरूपाः आगमोक्ताः पुनः कीदृशाः नवनिधेः नवसंख्याकानिधयो यस्य ते चमहापद्माख्याः प्रसिद्धाः॥
नवानां रसानां निधिरित्यर्थो तरं नवो नूतनो निधिरिति वा पुनः कीदृशाः पुष्पदृशामत्स्यः पुष्यंति वर्धमानादृशायस्य
॥२॥ तादृशाप्रत्ययो ज्ञानं यस्य तादृशाः तथा स्मार्तानां पाखंडभिन्नानां शिष्टानां उच्छायस्य पृथ्वे धुरंधरः तत्र वर्तक इत्यर्थः
नन्वेतावतापि तव कुतो धर्मनिर्णयकर्तृसामर्थ्यं तत्राह॥ व्यामूढानामिति॥ इह लोके व्यामूढानां पुरुषार्थज्ञानशू
न्यानां तनुभृतां शरीरिणां जाह्नवीतकं तीर्थं पुरुषार्थप्राप्त्युपाय इत्यर्थः॥ तथा सन्निधिवैकल्ये दर्योपेषां तेषां पंडितानां विद्या

व्यामूढानामिह तनुभृतां जाह्नवी तीर्थमेकं विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदपानां॥ सर्वेषां तत्प्रथमसुख
दं भारती तीर्थमाहुस्तद्वावान्मे विमलमनसो निर्णयेशक्तिरस्ति॥३॥ व्याख्या पमाधवाचार्यैर्धर्मान्पारा
शराक्तनय॥ तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः॥४॥ अर्थोनुक्रम्यते स्पष्टो वैरखिलो निर्णिनीषितः तावे
तैर्यानुतिष्ठासुर्निःसंदेहप्रवर्ततां॥५॥

रूपं तीर्थमस्तीति शेषः॥ कीदृक् प्रकृत्यैव विमलं तथा सर्वेषां जनानां प्रथमतः सुखदं भारतीरूपं तीर्थमाहुः शिष्टा इति शेषः
भारतीतीर्थं नामानं पूर्वोक्तं गुरुमिस्यपरोर्थः॥ व्याख्यायेति॥४॥ शिष्यावधानाय वक्तव्यं प्रतिजानीते॥ पाराशरानं
पराशरप्रोक्तान् एतेन कालनिर्णयस्य प्रयोजनं धर्मानुष्ठानमुक्तं॥ वक्ष्यमाणानुक्रमणस्य प्रयोजनमाह॥ अर्थ इ
ति॥५॥ अनुक्रम्यते॥ संक्षेपेण कथ्यते निर्णिनीषितः निर्णेतुमिष्टः तावतैवेति अनुक्रममात्रादेवेत्यर्थः॥ अनुतिष्ठासुः

×तस्मिन्नभावाद्वाक्तेर्यद्वात्त्रविमलं संशयरहितं मनो यस्य तादृशस्य मम धर्मनिर्णये शक्तिरस्तीत्यर्थः॥३॥

अनुष्ठानेच्छुः [illegible]

त्व॰ ह्द॰ पंचप्रकरणान्यत्र तेषूपोद्घातवत्सरौ॰ प्रतिपत्तिथयो नक्षत्रादि रीतिक्रमः॥७॥ सिध्यर्थं ३

ननु वादिकृतविप्रतिपत्तौ संदेहात् कथं निर्णयः॥ तत्राह॥ ततइति॥६॥ मीमांसा धर्मनिर्णये छात्रधीवं चेतं यस्य तस्य समाधाना
य संदेहनिरासाय तत् अनुक्रांतमर्थजातं यथान्यायं न्यायानुसारेण विचार्य विस्तारपूर्वकं कथयिष्य इत्यर्थः॥७॥ पंचेति
प्रकरणानि निरूपणीयार्थस्थानानि॥ तेष्विति क्रमइत्यन्वयः॥ उपोद्घातः प्रकृतैश्चिंतनमेकं संवत्सरप्रकरणं द्वितीयं प्रतिप
त्प्रकरणं तृतीयं अवशिष्टतिथिप्रकरणं चतुर्थं नक्षत्रादिप्रकरणं पंचमं॥ इति क्रमेणेत्यर्थः॥ उपोद्घातप्रकरणे वक्तव्यं दर्शय
ति॥ उपोद्घात इति॥८॥ कालसत्वं कालसाधनं तस्य कालस्य निर्णययोग्यता अब्दादिखंडकालनिर्णयस्यायोग्यत्वेपि नि

×उपोद्घाते कालसत्तं तस्य निर्णययोग्यता ईश्वरो नित्यकालात्मा चिंतनीयः सकर्मसु॥८॥ जन्ये काले द्वमुख्यत्वमुक्तमेत
च्चतुष्टयं अध्ययनर्तुमासाः पक्षप्रकरणांतरे॥९॥ अब्दः पंचविधश्चांद्रो व्रतादौ तिलकादिके॥ सुजन्मादिव्रते सौरो
गोसत्रादिषु सावनः॥१०॥ त्रयोप्याचार्यसेवादौ विकल्प्यंते निजेच्छया॥ आयुर्दायेतु नाक्षत्रो वार्हस्पत्योब्धिवत्सरे॥११॥

त्यकालस्य कथमनुष्ठानांगत्वं॥ तत्राह॥ ईश्वरइति॥ ईश्वरस्य सकलकर्मारंभे स्मरणस्य विधानात् तस्य चानित्यकालात्म
कत्वात्तदनुसंधानार्पितान्निर्णय इत्यर्थः॥ तदुक्तं प्रयस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति स
द्यो वंदे तमच्युतमिति॥ सर्वेषारंभकार्येषु त्रयस्त्रिभुवनेश्वराः देवादिशंतु नः सिद्धिं ब्रह्मेशानजनार्दना इति च॥९॥
जन्य इति॥ जन्यकालमध्ये अब्दस्य मुख्यत्वं प्रधानत्वं अयनर्तुनीनां तु तदवयवत्वमित्यर्थः॥ एवं च अब्दमारभ्यैव ज
न्यकालनिरूपणं युक्तमिति भावः॥ प्रकरणांतरे संवत्सरप्रकरणे॥ अब्द इति॥१०॥ अब्दः संवत्सरः पंचविधः॥ चांद्रः सौ
रः सावनः नाक्षत्रः वार्हस्पत्यइति॥ तत्र चांद्रो नाम चैत्रादिद्वादशमासात्मकः सौरो नाम संक्रांतिघटित द्वादशमासा

॥मीमांसायां तस्य समाधानाय तत्पूर्वः॥ विचारि [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

त्मकः। नाक्षत्रो नाम नाक्षत्रघटित द्वादशमासात्मकः सावनः। चैत्रादिवसात्मकः द्वादशमासात्मकः बार्हस्पत्यो नाम बृहस्प
तेरेकराशिभोगपर्यंतः। तत्र चांद्रस्तिलव्रतादिव्रते ग्राह्यः। तत्र तिलव्रतं भविष्योत्तरपुराणे। वसंते किंशुकाशोक
शोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः। कर्षमात्रप्रदे तिलं कुर्याच्चंदनपंकजं। ततः
प्रभृत्यनुदिनं तिलकालं कृतं मुखं धार्य संवत्सरं पावकं शिरं नैव नभस्यलामिति। अत्र शुक्लप्रतिपदमारभ्यविधानात् शु
क्लप्रतिपदादिदर्शांतचांद्रमासघटितं वर्षं। सौरवर्षानुसारेण सुजन्मावाप्तिव्रतं विष्णुधर्मोत्तरे उक्तं। मेषसंक्रमणे भानोः सोप
वासो नरोत्तमः। पूजयेद्भार्गवं देवं रामं रामस्य पापघ्नः। वेधे। इत्यारभ्य मीनसंक्रमणे मत्स्यं वासुदेवं पूजयेदित्यंते नग्नंपे प्र
न। अंते च कृत्वा व्रतं वत्सरमेतदिष्टं न्यचे न बुतिं यत्तु न चापि जन्मेत्युपसंहृतं। अत्र संक्रांतिमारभ्य संवत्सरगण
नात्सौरं वर्षं ग्राह्यं। तथा गोसत्रं गवामयनाख्यं तत्र सावनः संवत्सरः स च षष्ठ्याधिकशतत्रयात्मकः। आचार्यसेवा दिना
दौ तु त्रयाणामपि संवत्सराणां विकल्पेन ग्रहणं। आयुर्दायगणनायां नाक्षत्रः संवत्सरो ग्राह्यः। अधिवत्सरो नाम म
ध्यममानेन रूपसंक्रांतिहीनोपलक्षितो वत्सरः तत्र बार्हस्पत्यः संवत्सरो ग्राह्यः॥११॥

३

अथ चांद्रस्यावांतरभेदानाह। चांद्राणामिति। चांद्राणां प्रभवादीनां मध्ये पंचके युगे। संघे। प्रथमस्य संवत्सर इति। द्वितीयस्य परिवत्सर इति सं
ज्ञा। तृतीयस्येदावत्सर इति। चतुर्थस्यानुवत्सर इति। पंचमस्येद्वत्सर इति। एवं पंचसु जातेषु पुनर्द्वितीयपंचके एताः एव संज्ञा ज्ञेयाः। तथा च ब्र
ह्मवैवर्ते। संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः। इदावत्सरस्तृतीयश्चतुर्थश्चानुवत्सरः। इद्वत्सरः पंचमस्तु तत्संघो युगसंज्ञक इति। एतेषां
विनियोगो विष्णुधर्मोत्तरे। संवत्सरे तु दातृणां तिलदानं महाफलं। परिपूर्वे तथा दानं यवानां द्विजसत्तम। इदापूर्वे च वस्त्राणां धान्यानां चानुपूर्व
के। इद्वत्सरे रजतस्यापि दानं प्रोक्तं महाफलमिति। तदाह। तिलजरत्यादि। उग्रदाते। दाक्षेणायनं कर्कादिकं तु चयं उग्रदैवते कर्मणि ग्राह्यं। उत्तरायणं तु म

चांद्राणां प्रभवादीनां पंचमे पंचमे युगे। संपरीदान्वे दिसेत... पूर्वास्तु वत्सराः॥१२॥ तिलोयवोथ वस्त्र धान्य रजतं दीय
ते चतु॥ उग्रे कर्मणि शांते च स्तोंपने दाक्षेणोत्तरे॥१३॥ वसंताद्यृतवो द्वेधा चांद्रसौराश्च चांद्रकाः। चैत्राद्या अथ मीनाद्या मेषाद्या वाधि

करादिकं तु चयं सौम्ये कर्मणि। तदुक्तं वैखानससंहितायां। मात्स्यभैरववाराहनारसिंहा। त्रिविक्रमाः। महिषासुरहंत्री च स्थाप्या वै दाक्षेणायन इति।
प उत्तरायणस्य सौम्य कर्मांगत्वं स्मृतिप्रसिद्धं। उदगयन आपूर्यमाणे पक्षे इत्यादौ। वसंतादीनिति॥१४॥ वसंताद्याः षड् ऋतवो द्विधा। चांद्राः सौराश्च। तत्र चांद्रमा
सेन चैत्रादिमासद्वयं वसंतः। ज्येष्ठादिमासद्वयं ग्रीष्मः। श्रावणभाद्रपदौ वर्षर्तुः। आश्विनकार्तिकौ शरदृतुः। मार्गपौषौ हेमंतः। माघफाल्गुनौ
शिशिरः। तथा च श्रुतिः। मधुश्च माधवश्च वासंतिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतू। इषश्चोर्जश्च
शारदावृतू। सहश्च सहस्यश्च हैमंतिकावृतू। तपश्च तपस्यश्च शैशिरावृतू इति। यद्यपि मासद्वयात्मक एकैक ऋतुः तथापि स्त्री तू इति द्विवचनं
तदवयवमासद्वयाभिप्रायं मध्वादिशब्दाश्च चैत्रादीनां समानार्थवचनाः। अत्र च वसंतस्य प्राथम्यं मुख्यं वा एतदृतूनां यद्वसंत इति श्रुतिवशाद्वगंत
व्यं। वैवस्वतः सूर्यस्य सौरादृतवः। ते च मीनाद्या मेषाद्या वेति विकल्पः। तथा च श्रुतिः। मीनमेषयोर्मेषवृषयोर्वा वसंत इति। ऋतुविनियोगस्तु वसंते

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणोग्नीनादधीत इत्यादिश्रुत्याक्षेपः। एवं विष्णुधर्मोत्तरे षड्ऋतुस्तुत्युपक्रम षण्मूर्तिपूजोक्ता। तथा वसंते स्नानानुलेपनादिदानं ग्रीष्मे पान

१८

कादिदानमुक्तं देवीपुराणे वर्षास्तु तिलदानमुक्तं तथा विष्णुधर्मोत्तरे एवं शरद्यन्नदानं हेमंते वस्त्राग्निदानं शिशिरे च वस्त्रदानमित्युक्तं तदा

४ हतेष्विति। अथ मासो निर्णीयते। मासश्चत्वारो दिना सावनस्त्रिंशद्भिरहोरात्रैः परिमितः लोकव्यवहारे प्रसिद्धः सूर्यस्यैकराशिभोगावच्छिन्नः कालः सौरः

श्री अश्विन्यादिसप्तविंशतिनक्षत्रपरिवर्तो नाक्षत्रः। चांद्रः शुक्लादिदर्शांतः पूर्णिमांतश्चेति द्विविधः। तदुक्तं ब्रह्मसिद्धांते

चांद्रः शुक्लादिदर्शांतः सावनस्त्रिंशता दिनैः। एकराशौ रविर्यावत्कालं मासः स भास्करः। इति। विष्णुधर्मोत्तरे सर्वर्क्ष

॥ मासास्तु सावनः सौरश्चांद्रो नाक्षत्र इत्यमी ॥१५॥ दर्शांतः पूर्णिमांतो वा चांद्रो सो द्विप्रवेशयोः। सौरो राशेः सावन

स्तु पक्षे ज्यौतिषिके परः ॥१६॥ माघादिमासभेदेषु तिलदानादयः स्मृताः ॥

१५ र्क्षपरिवर्तैस्तु नाक्षत्रो मास उच्यत इति तेषां व्यवस्थामाह असौ द्विप्रवेशयोरिति असौ चांद्रः द्विप्रवेशयोर्विहिते कर्मणि ग्रा

ह्य इत्यर्थः। राशेः कर्मणि सौरः। सावनस्तु यज्ञे गवामयनादौ चैत्रादिनाम कर्मेऽधिमासस्य ग्रहणात्। ज्यौतिषिके आयुर्दायविभागा

दौ परो नाक्षत्र इत्यर्थः। तदुक्तं ब्रह्मसिद्धांते अमावास्यापरिच्छिन्नो मासः स्यात् ब्राह्मणस्य तु संक्रांतिपूर्णमासीभ्यां तथैव नृपवै

श्ययोरिति दर्शांतानां पूर्णिमांतानां च मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ता तदुक्तं संकर्षणकांडे द्वे द्वे चैत्रादितारकाणां

परिपूर्णेंदुसंगमे मासाश्चैत्रादयो ज्ञेयाः चैत्रैः षष्ठ्यास्य सप्तमादिति परिपूर्णेंदुसंगमे पंसैवं द्विपूर्णिमास्या चैत्रादितारकाणां ४

द्वे द्वे भवत इति शेषः ते मासाश्चैत्रवैशाखादिसंज्ञा इत्यर्थः। यस्मिन्मासे पूर्णिमा चैत्र्यास्यात् सौरन्यतरेण पूज्यते स चैत्रः।

एवं वैशाखादयो विशाखादिनक्षत्रयोगेन ज्ञेयाः षष्ठो भाद्रपदः। द्विकैः शततारका पूर्वाभाद्रपदा उत्तराभाद्रपदाख्यैस्त्रिभिस्तत्पूर्णिमायोगे

सप्तम आश्विनः रेवत्यादित्रिकयोगे अंत्यः फाल्गुनः पूर्वाफाल्गुन्यादित्रिकयोग इत्यर्थः। सौरादिमासचतुष्टयमध्ये द्वौ चेत्तस्य

चैत्रमासस्त्वं ज्योतिर्गर्गेष्वपि उक्तं सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यत इति मलमा

सं निरूपयति चांद्र इति तदुक्तं ब्रह्मसिद्धांते चांद्रो मासो ह्यसंक्रांतो मलमासः प्रकीर्तित इति अयमर्थः शुक्लप्रतिपदादिदर्शांतश्चांद्रो मासः॥

तन्मध्ये रविसंक्रांत्यभावे मलमासो भवतीति तथा च चतुर्दश्याममावास्यायां वा रविसंक्रमणं ततः शुक्लप्रतिपदमारभ्य दर्शांतं मासमति

संतक क्रम्य प्रतिपदादौ रविसंक्रमणं तत्रासंक्रांतो मलमासः इति मलसंचयकालाधिक्यात् तथा च गृह्यपरिशिष्टे मलं वदंति कालस्य मासं

॥ चांद्रोऽधिमासोऽसंक्रांतः सोंऽतर्भवति चोत्तरे ॥१७॥

कालविदोऽधिकमिति कालाधिक्यं च धर्मोत्तरे दर्शितं। सौरेण वत्सरमानेन यदा भवति भार्गव सावने तु तदा माने दिनषट्केन पूर्यते

दिनरात्रात्रतेराम प्रोक्ताः संवत्सरेण षट्। सौरसंवत्सरस्यांते मानेन शशिजेन तु एकादशातिरिच्यंते दिनानि भृगुनंदन वर्षद्वये

साष्टमासे तस्मान्मासोऽतिरिच्यते स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हित इति सौरसंवत्सरः षड्भिर्दिनैः सावनादतिरिच्य

ते। एकादशभिर्दिनैश्चांद्रादतिरिच्यते तथा च चांद्रसंवत्सरद्वयात् सौरवत्सरद्वयं द्वाविंशत्या दिनैरधिकं भवति अतस्तु ऊर्ध्व

सौरमासाष्टकं चांद्रान्मासाष्टकात् सार्धैः सप्तभिर्दिनैरतिरिच्यते तथा च मिलित्वा दिनार्धेन न्यूनो मासो भवति सोयमधिमास इति अथवा शेषदि

नार्धपूरणं च यथोक्तकालादूर्ध्वं षोडशभिर्दिनैः संपद्यते अत एव सिद्धांते अभिहितं द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा घटिका कौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांचतुष्केणपततिह्यधिमासकइति॰यस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेववा॰मलमासःसविज्ञेयोमासेत्रिंशत्तमेभवेदिति॰कार्त्तकवच
५ नंतुज्योतिःशास्त्रप्रसिद्धस्फुटमानाभिप्रायं।द्वात्रिंशद्भिरितिवचनंतुमध्यममानाभिप्रायमितिनविरोधः॥यद्यपिद्वात्रिंशन्मे
सेषुगतेषुयोऽधिकोमासःशुक्लप्रतिपदादिदर्शांतलाभावात्तच्छ्रौतस्मार्तकर्मानुपयुक्तःइंद्राग्नीपर्यायेतेमासादिःसप्रकीर्ति
तः।अग्नीषोमौस्थितौमध्येमासांतेपितृसोमकौ॰तमतिक्रम्यतुयदाराधिर्गच्छेत्कदाचन॰आद्योमलिम्लुचोज्ञेयोद्वितीयःप्राकृतः
स्मृतः।अयमर्थः।दर्शपूर्णमासयाजिनाशुक्लप्रतिपदिदर्शेष्टिदेवावैंद्राविंद्राग्नीहूयेते॰कृष्णप्रतिपदितुपूर्णिमासेष्टिदेवा
वग्नीषोमौ।अमावास्यायांपिंडपितृयज्ञदेवौसोमपितृकौ।तच्चैवंसतिशुक्लप्रतिपदिदर्शांतोमासःसंक्रांतिरहितोऽधि
कमासइत्यर्थाल्लभ्यतेइति॰तस्मान्मध्यममानगणनाश्रौतस्मार्तयोर्नोपयुक्ता।दर्शांतद्वात्रिंशन्मासोत्तरंषोडशदिनेषु
गतेषुकृष्णद्वितीयायांमलमासोपक्रमःतथापिकालाधिक्यमात्रेतदुदाहरणं।त्रिंशत्तमेभवेदितिधर्मशास्त्रोपयोगीति
बोध्यं।यद्यपिन्यूनाधिकसंख्यायाअपिदर्शनान्नत्रिंशत्तमत्वेनियमः तथापित्रिंशत्तमत्वस्योपलक्षणत्वान्नदोषः।सोंतर्भ
वतीति॰उत्तरमासस्त्रिषड्स्पर्शः।तथाचज्योतिषे।षष्ठ्यातुदिवसैर्मासःकथितोबादरायणैः।पूर्वमर्धंतुसंत्यज्यकर्तव्याचोत्तरेक्रि
याइति॰तथाआद्योमलिम्लुचोज्ञेयोद्वितीयःप्राकृतइतिच॰एवंचयदापूर्णिमोतत्रैवतुदर्शेपि ४ च कृष्णचर दर्शेयामीन ५
संक्रांतिस्ततःशुक्लप्रतिपदिमारभ्याऽमिमदर्शपर्यंतंनसंक्रांतिर्वृत्तुतदुत्तरप्रतिपदिद्वितीयायांवामेषसंक्रांति
स्तत्रशुक्लप्रतिपदादिदर्शांतेत्रौऽसंक्रांतेमलमासअधिकमासइतिव्याख्यायते।एवंवैशाखादिष्वपिचज्ञेयं॥१७॥

असंक्रांताविति॰एकस्मिन्वर्षेचेद्द्वावसंक्रांतौभवतस्तदातयोर्मध्ये आदिमःप्रथमःसंसर्पसंज्ञकः तत्रद्वयोरसंक्रांत्योर्मध्ये॰
संक्रांतिद्वययुक्तःसचक्षयमाससंज्ञकःअंहस्पतिसंज्ञकश्चभवति॰एवंकार्तिकादिमासत्रयएवक्षयमासोनान्यत्र॰तदुत्तरस्योप
रोऽसंक्रांतोभवति॰अत्रद्विसंक्रांतियुक्तस्यक्षयसंज्ञायांहेतुरुच्यते॰यदाधनुस्थरवौदर्शमासस्तदातस्यमेषादिस्थेसवितरियो
योमासःप्रपूर्यतेचांद्रःचैत्राद्यःसतेपइतिवचनेनमार्गशीर्षत्वंप्राप्तः।यदातुएकस्मिन्नेवमासेशुक्लप्रतिपदिधनुःसंक्रांतिस्त
तत्तैउर्ध्वंदर्शेमकरसंक्रांतिःसमासोद्विसंक्रांतःक्षयाख्यःतत्रचधनुस्थेरवौदर्शांतमासःमकरस्थेतुसेमासः अतःपौषमासस्तंतस्य
असंक्रांतावेकवर्षेद्वौचेत्संसर्पआदिमःक्षयमासोद्विसंक्रांतःसचांहस्पतिसंज्ञकः॥१८॥
॰संपन्नं॰तथाचमार्गशीर्षस्यतत्रधुतस्तात्क्षयसंज्ञायुक्तइति॰तदुक्तंज्योतिषे॰असंक्रांतिमासोऽधिमासःस्फुटःस्याद्विसंक्रांति
मासःक्षयाख्यःकदाचित्।क्षयःकार्त्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येऽधिमासद्वयंचेति॰यदाअमांतमानेनभाद्रपदा
मावास्यायांकन्यासंक्रांतिःतदूर्ध्वमसंक्रांतमेकमासमतीत्योत्तरयोर्मासयोःक्रमेणतुलावृश्चिकसंक्रांतीभवतस्ततऊर्ध्वमेकस्मि
न्नेवमासेशुक्लप्रतिपदिधनुःसंक्रांतिः तदनंतरदर्शेमकरसंक्रांतिःसक्षयमासःततऊर्ध्वंकुंभसंक्रांतिरमावास्यायांततऊर्ध्वं
मेकसंक्रांतमासमतीत्यशुक्लप्रतिपदिमीनसंक्रांतिः।एवंसत्येकस्मिन्नेववसंवत्सरेद्वावसंक्रांतौमासौएकश्चमध्येद्विसं
क्रांतमासइतिपद्योक्तमासत्रयसंपत्तिर्बोध्या॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चपस्त्याज्येति· विवाहादौ शुभकार्ये चयोप्येते वर्जनीयः तदुक्तं ज्योतिषे॰ यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा· संसर्पांहस्पती मासावधि
मास· श्चाविंदितौ इति· तत्राविशेषमाह॰ संसर्पेति· संसर्पः प्रथमासंक्रांतः अंहस्पतिः क्षयमासः एतौ द्वौ श्रौते स्मार्ते च कर्मणि शु
६ द्धौ॰ गर्ह्यौ ऽस्पर्शः तदुक्तं मासद्वये ऽब्दमध्ये तु संक्रांतिर्न यदा भवेत् प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः इति· प्राकृतः शु
द्धः अतएव संम्यक् सर्पतीति कर्मास्विति योग्यत्वात् संसर्पसंज्ञा· एवं क्षयमासेऽपि तत्र प्राप्तस्य कर्मणो ऽन्यत्रासंभवात्तत्र कर्माणि श्रौ
द्धादौ शुद्ध एव· ननु क्षयमासे एकमासस्वरूपाल्पत्वं तत्र युक्तं कर्मानुष्ठानं· कथं च द्वादशमासाः संवत्सर इत्यस्य नियम इति चेदु
च्यते॰ पंचमासि रविसंक्रमणद्वयं तत्र मासयुगं तु क्षया द्वयमिति· मासद्वयात्मकत्वेन एकस्यैव क्षयस्योच्यते· तथा च वचनांतरं॰

चपस्त्याज्या विवाहादौ संसर्पांहस्पती शुभौ· शुद्धौ श्रौते तथा स्मार्ते मलमासो विविच्यते ।।१९।। काम्यारंभं तत्समाप्तिं
मलमासे विवर्जयेत्॰ आरब्धं मलमासात्प्राक् कृच्छ्रसत्रादिकं च यत् ।।२०।। तत्समाप्यं सावनस्य मासस्यातिक्रमे लंघनात्

द्वौ संक्रांति क्षयः स्यात्स एकोपि द्व्यात्मको भवेत् इति· तत्र चैवं व्यवस्थोक्ता॰ तिथ्यर्धे प्रथमो पूर्वो द्वितीये ऽर्धे तदुत्तरः । मासाविति बुधैश्चिंत्यौ
क्षयमासस्य मध्यगाः इति॰ इदानीं मलमासे कार्याकार्यनिर्णयः क्रियते॰ काम्यारंभेत्यादिना॰ अत एव पैठीनसिः। श्रौतस्मार्तक्रियाः सर्वाः
द्वादशे मासि कीर्तिताः। त्रयोदशे तु सर्वास्ताः निष्फलाः इति कीर्तिताः ।। स्मृत्यंतरेऽपि॰ इष्ट्यादि सर्वं काम्यं तु मलमासे विवर्जयेदिति॰ अयं
च निषेध आरंभसमाप्तिविषयः। असूर्या नाम ये मासा न तेषु मम संमताः। अतो नां चैव यज्ञानामारंभाश्च समाप्तय इति॰ पूर्वमारब्धं तु ६
कृच्छ्रादि मलमासेऽपि समापनीयमित्याह॰ आरब्धमिति॰ अत्र हेतुमाह॰ सावनस्येति॰ द्वादशाहोरात्रमितत्वात् कृच्छ्रस्य मध्ये विरामा
योगादिति भावः ।।

आरंभसमाप्त्योर्मध्यपातितौ नित्य आधिमासेऽपि कर्म कर्तव्यमित्याह॰ आरंभेति॰ तथा च स्मृतिः। अधिमाससन्निपातेऽपि ह्येष एव विधिः क्रम इति॰ २१॥
काम्यस्यापि क्वचित्कर्तव्यतामित्याह॰ कारीर्येति॥ कारीर्याद्विष्टि कामो यजेतेति विहिता कारीरी संज्ञका इष्टिस्तदारंभसमापने मलमासेऽपि कर्तव्ये· शु
द्धमासप्रतीक्षायां क्षेत्र शुष्कताप्रसंगात्॰ अतएव काठकगृह्ये मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियामिति॰ नित्याऽग्निहोत्रादिरूपा॰
नैमित्तिकी ग्रहणस्नानादिरूपा॰ तदुक्तं गृह्यपरिशिष्टे॰ अवषट्कारहोमाश्च पर्व चाग्रयणं तथा॰ मलमासेऽपि कर्तव्याः काम्या इष्टीः विवर्जयेत्॰ कर्तव्याग
हणेष्टिश्च चातुर्मास्यानि चैव हीति॰ अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवादयः पर्व दर्शपूर्णमासैष्ट्यादि ओपार्वणेश्च॰ दर्शादीनां नित्यत्वमकरणे

आरंभस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः ।।२१।। प्रवृत्तमखिलं काम्यं तदनुष्ठेयमेव तु॰ कारीर्यादि तु यत्काम्यं तस्यारंभ
समापने ।।२२।। कार्यकालाविलंबस्य प्रतीक्षाया असंभवात्॰ अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत् ।।२३।।
गत्यंतरयुतं नित्यं सोमयागादि वर्जयेत्॰ अगतिग्रहणस्नानजातेष्टिर्गतिसंयुता ।।२४।। इयं नैमित्तिकं तस्य व्यवस्था नित्यवन्मता॥

मत्यवायादवगंतव्यं॰ नित्येति॰ पूर्वोक्त काम्यस्याप्युपलक्षणं॰ अनन्यगतिकस्य तुल्यत्वात्॰ अनन्यगतिकानि नैमित्तिकान्याह॰ यामिति॰ चंद्रसूर्यग्रहे
स्नानं श्राद्धदानजपादिकं कार्याणि मलमासेऽपि नित्यनैमित्तिकं तथेति॰ एवं सति सगतिकं नित्यनैमित्तिकमेव वर्जनीयमित्याह॰ गत्यंतरयुतमि
ति॰ सोमयागादि वसंते विहितः वसंतश्च मलमासवर्जनेऽपि शुद्धमासे संभवतीति सगतिकं गतिकं तु॰ तथा च काठकगृह्ये॰ सोमयागादिक
र्माणि नित्यान्यपि मलिम्लुचे॰ षष्ठीज्याग्रहणाध्यान चातुर्मास्यादिकान्यपि॰ महालयाष्टका श्राद्धोपाकर्माद्यपि कर्म यत्॰ स्पष्टमासविशेषा
ख्याविहितं वर्जयेन्मल इति॰ षष्ठीष्टि काठकशाखादौ प्रसिद्धा॰ जातेष्टिर्गतिसंयुतेति॰ जातेष्टिर्जननानंतरं विहिता॰ जातकर्मानंतरं
चस्तनप्राशनं॰ न ततः पूर्वं॰ एवं च प्रथमं जातेष्टिस्ततो जातकर्म ततस्तनप्राशनमिति बालविपत्तेः शंकास्यादितः शेषिविशेष्याज्जा
संतुरंभवते ति तकर्मादिति॰ एवं च नैमित्तानंतर्यबाधस्याविरोधादौ शौचापगमे कार्या॰ एवं पर्वकालानुग्रहार्थं तत्प्रतीक्षापि॰ तथा॰ शुद्धमासप्रती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयापिक्रियमाणानदुष्यतीतिसगतिकत्वंद्रष्टव्यं॰ आग्रयणस्यचपुराणान्नलाभेसतिगौणकालत्वंतदलाभेऽगतिकत्वं॰ २४० नित्यवदिति॰ यथानित्य
मगतिकंकार्यंसगतिकंनकार्यं॰ तथानैमित्तिकमपीत्यर्थः॥ एवंचावश्यकंकाम्यमनन्यगतिकंनित्यनैमित्तिकंमलमासेकार्यमितराणि
इतिवर्ज्यावर्ज्यविवेकः संपन्नः॥ तत्रकार्याणिकालादर्शेदर्शितानि॰ द्वादशाहसपिंडांतकर्मग्रहणजन्मनोः सीमंतेपुंसवेश्राद्धं द्वावेतौजा
तकर्मच॰ श्राद्धंनांदीश्राद्धं॰ द्वावेतौसीमंतपुंसवौ॰ रोगेशांतिरलभ्येचयोगेश्राद्धव्रतानिच॰ प्रायश्चित्तंनैमित्तिकस्यवशात्पूर्वपरत्रच॰ अब्दोदकुंभमन्वादिमहालययुगादि
षु॰ श्राद्धंदर्शेप्यहरहः श्राद्धंन्यूनादिमासिकं॰ मलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकं॰ श्राद्धंतुपूर्वदृष्टेषुतीर्थेष्विवयुगादिषु॰ मन्वादिषुचयद्
नंदानंदैनंदिनेचयत्॰ तिलगोभूहिरण्यानांसंध्योपासनयोः क्रिया॰ पर्वहोमआग्रयणंसाग्नेरिष्टिश्चपर्वणोः॥ नित्याग्निहोत्रहोमाश्चदेवताति
थिपूजनं॰ स्नानंचस्नानविधिनाप्रभस्यापिपवर्जनं॰ तर्पणंचानिमित्तस्यानित्यत्वादुभयत्रच॰ अनित्यमनिमित्तंचदानंचमहदादिकं॰
महदादिकंषोडशमहादानादि॰ अग्न्याधानाध्वरापूर्ततीर्थयात्रामरेक्षणं॰ देवारामतडागादिप्रतिष्ठामौंजिबंधनं॰ आश्रमःस्वीकृतिः
काम्यवृषोत्सर्गश्चनिष्क्रमः॥ राजाभिषेकप्रथमश्चूडाकर्मव्रतानिच॰ अन्नप्राशनमारंभोगृहाणांचप्रवेशनं॰ स्नानंविवाहोनामांतिपन्नंदेवम
हेत्सवं॰ व्रतारंभसमाप्तीचकाम्यकर्मचपापमनां॰ प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत्॰ उपाकर्मोत्सर्जनंचपश्चिंत्रदमनार्पणं॰ अवरोहश्च
हैमंतसर्पाणांबलिरष्टकाः॥ ईशानस्यबलिर्विघ्नोः शयनंपरिवर्तनं॰ दुर्गेंद्रस्थापनोत्थानेध्वजोत्थानंचवाजेशणः॥ पूर्वत्रप्रतिषिद्धानि
परत्रान्यत्रदैविकमिति॰ अत्रद्वादशाहेत्यारभ्यानित्यत्वादुभयत्रेचेत्यंतेनग्रंथेनकर्तव्यसंग्रहः अनित्यमनिमित्तंचेत्यारभ्य
वर्जयेदित्यंतेनवर्ज्यसंग्रहः॥ उपाकर्मेत्यारभ्यपरत्रान्यत्रदैविकमित्यंतेनमलमासेवर्जितानांसतांशुद्धमासेअवश्यकर्तव्य
त्वेनसंग्रहः॥ अत्रसर्वसाक्षीवचनान्युदाहरामः॥ यमः॥ गर्भेवार्द्धुषिकेभृत्येश्राद्धकर्मणिमासिके॰ सपिंडीकरणेनि

अतिक्रांतकालंनामकर्म

त्येनाधिमासंविवर्जयेत्॰ तीर्थस्नानंजपोहोमोयवव्रीहितिलादिभिः॥ जातकर्मांत्यकर्माणिनवश्राद्धंतथैवच॰ मघात्रयोदशीश्राद्धंश्रा
द्धान्यपिचषोडश॰ चंद्रसूर्यग्रहेस्नानंश्राद्धंदानंजपादिकं॥ कार्याणिमलमासेपिनित्यनैमित्तिकंतथेति॰ मासिकेश्राद्धकर्मणि॰ अमावा
स्याश्राद्धकर्मणीत्यर्थः॥ नित्ये॰ नित्यदाने॰ होमोत्रोपासनहोमः॥ अंत्यकर्माणिदहनोदकपिंडदानास्थिसंचयनादीनि॰ स्मृत्यंतरे॰ श्रा
द्धजातकनामानियेचसंस्काराःसव्रताः॥ मलिम्लुचेपिकर्तव्याइष्टीःकाम्याश्चवर्जयेदिति॰ संस्काराअंनप्राशननिष्क्रमणादयः॥ सव्र
ताश्चातुर्मास्यादयः॥ गभस्तिः॥ एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते॰ तत्कार्यंपूर्वमासेचकालाधिक्येचधर्मतइति॰ मरी
चिः॥ रोगेचालभ्ययोगेचसीमंतेपुंसवेपिच॰ यद्दृष्टातिसमुद्दिष्टंपूर्वत्रापिनदुष्यतीति॰ ननुसंग्रहवचनेमहालयश्राद्धस्या
प्युभयत्रकर्तव्यतोक्तामहालययुगादिषित्युक्तेः सोचवचनांतरविरुद्धं॰ महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत्॰ स्पष्टमा
साविशेषाख्याविहितंवर्जयेन्मलइतिनिषेधात्॰ नागरखण्डेपि॰ नभोवाथनभस्योवामलमासोयदाभवेत्॰ सप्तमःपितृपक्षस्या
दन्यत्रैवतुपंचमः॥ अत्रसप्तमपंचमौआषाढ्यवधिंकृत्वाद्रष्टव्यौ॰ नायंदोषः॥ तत्रमहालयशब्देनतीर्थविशेषस्यविवक्षित
त्वात्॰

शुद्धमासमृतानामिति॰ तथा च हारीतः॥ असंक्रांते हि कर्तव्यमाब्दिकं प्रथमं द्विजैरिति॰ तथा॰ प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रियासु
तैः॥ क्वचित्त्रयोदशेपि स्यादाद्यं मुक्त्वा तु वत्सरमिति॰ अत्र द्वादशे मासि पूर्णे सति अनंतरदिने कार्यमिति व्याख्येयं॰ एवं च त्रयोदशाह
८ त्यत्रापि॰ आद्यं द्वितीये द्वितीयवर्षादावेव संभवात्॰ मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियते हनि॰ प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य
तु विदुरिति व्यासवचनात्॰ तस्माच्छुद्धमासमृतानां प्रथमाब्दिकं मलमासे एव कार्यं॰ द्वितीयाद्याब्दिकं तु शुद्ध एवेति व्यवस्थयोभ
शुद्धमासमृतानां तु स्यान्मलिने प्रथमाब्दिकं॥२५॥ मलमासमृतानां तु मले स्याद्द्याब्दिकांतरं॥
यत्र कर्तव्यतोक्ता ज्ञेया॰ मलमासमृतानां तु यदि कदाचित्स एव मलमासआगतस्तदा तत्रैव प्रत्याब्दिकं मलमासे कर्तव्यं॰ न तु परि
तने शुद्धमासे॰ तथा च मृगुः॥ मलमासमृतानां तु यच्छ्राद्धं प्रतिवासरं॰ मलमासे तु तत्कार्यं नान्येषां तु कदाचनेति॰ तथा॰ मलमासमृतानां तु
सौरं मासं समाश्रयेत्॰ स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु इति॰ तदेव यदि चेन्मलमास एव कार्यं॰ यथा शुद्धमासमृतानां
प्रथमाब्दिकं मलमासमृतानां माब्दिकांतरं च॰ किंचित्तु शुद्धत्वेपाकर्मादि सामगातिरिक्तानां॰ सामगानां तु मलेपि च॰ सिंहस्थे यथो
रवौ तद्विधानात्॰ सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्द्विजः॥ छंदोगाभिर्विता कुर्युरुत्सर्गं सर्वछंदसां॰ शुक्लपक्षे तु हस्ते न उपा
कर्मोपराकृ मितिगार्ग्यवचनात्॰ प्रथमोपाकरणं तु तेषामपि मले निषिद्धं॥ प्रथमोपाकृतिर्न स्यात्कृतकर्मा यिनासकृदिति व
चनात्॰ एवं चंद्रग्रहणादि सूनोत्कर्ष श्रुतुर्ष अपि युगादिषु॰ उपाकर्म महाषष्ठ्यो र्हेतिदत्तं यषादितद्वितिवचने उपाकर्मणो नुकर्षा
भिधानं सामगाविषयमेव ज्ञेयं॰ प्रकृतमनुसरामः॥ किंचिदुभयत्रापि कार्यं॰ यथाद्रकुमारादि॰ किंचिदन्यतरस्मिन्नेमित्तवशात्कर्त ८
व्यं॰ यथा द्वादशाहसपिंडीकरणादि॰ किंचिन्मलमासे वर्ज्यं॰ यथा आनित्यमनिमित्तं चेत्स्मादिति संक्षेपः॥२५॥

दैव इति॰ दैवे यागादिकर्मणि शुक्लपक्षः प्रशस्तः॥ यं कामयेत वसीयान्स्यादिति॰ तं पूर्वपक्षे याजयेत्॰ वसीयानेव भवतीति श्रुतेः॥ वसीयान्
वसुमत्तरः॥ पित्र्ये कर्माणि तु कृष्णपक्षः प्रशस्तः॥ यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते॰ तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते
इति मनुवचनात्॥ इति संवत्सरप्रकरणं॥ अथ प्रतिपत्प्रकरणमारभत इत्याह॥ तृतीये तिथिरिति॰ प्रथमकलानिष्पत्तिपरिमितः कालः
प्रतिपत्तिथिर्भवति॰ एवं द्वितीयादिष्वपि द्रष्टव्यं॥ तथा च स्कंदे॰ अमा षोडशभागेन देवि प्रोक्ता महाकला॥ संस्थिता परमा माया देहि
नां देहधारिणी॰ अमादि पौर्णमास्यंता या एव शशिनः कलाः॥ तिथयस्ताः समाख्याताः षोडशैव वरानने इति॥ अथ मर्यः॥

दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते॰ तृतीये तु प्रकरणे वर्ण्यते प्रतिपत्तिथिः॥२६॥ प्रतिपन्नाम विज्ञेया
चंद्रस्य प्रथमा कला॥ शुक्लपक्षे विशेच्चंद्रं कृष्णपक्षे विनिःसरेत्॥२७॥

याम हामायाआधारशक्तिरूपा देहिनां देहधारिणी संस्थिता सा चंद्रमंडलस्य षोडशभागेन परिमिता चंद्रदेहधारिणी अमानाम्नीम
अ हाकलेति प्रोक्ता क्षयोदयरहिता नित्याति थिसंज्ञकैव इतरास्तु पंचदशकलादिवसव्यवहारोपयोगिन्यः॥ क्षयोदयवत्यः पंचदशतिथयो भवंती
ति॰ तिथयः षोडशैवेत्यविरुद्धं वचनमिति॰ शुक्लपक्षे इति॰ वह्निनापीता प्रतिपत्कला शुक्लपक्षे चंद्रं पुनः प्रविशति॰ कृष्णपक्षे च ततो
विनिःसरति॰ वह्न्यादिदेवतानां कलापानं सोमस्तौ पठ्यते॰ प्रथमां पिबते वह्निर्द्वितीयां पिबते रविरित्यादि पंचदशीं प्रजापतिरि
त्यंतेन॥२७॥

सो॰९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं सर्वतिथिसाधारणी परिभाषोच्यते॰ शुद्धेति॰ शुद्धा विद्धा चेति तिथिर्द्विविधा॰ अन्यया तिथ्या उदयास्तमयांतराले रहिता शुद्धेत्यर्थः॥ विद्धां लक्षयति॰ उदयेइति॰
सूर्योदये पूर्वया तिथ्या त्रिमुहूर्तमितयाउत्तरा तिथिर्विध्यते॰ तथा सायं त्रिमुहूर्तमितया उत्तरया विध्यते न तु न्यूनयेत्यर्थः॥२८॥ वेध्यापीति॥ त्रिमुहूर्तपरिमिते
वा दिने विद्यमाना विद्धा भवति न न्यूनेत्यर्थः॥ तथा च पैठीनसिः॥ पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां॥ त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति॰ २
तथा॰ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॰ द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति विष्णुधर्मोत्तरवचनात्॰ अह्नः संबंधि द्विमुहूर्तं चेत्त्रिमु
हूर्तं चेत्यन्वयः॥ दैवतं॰ दैवकर्मयोग्यं॥ पित्र्यं पित्र्यकर्मयोग्यं॥ अतः सा तिथिः क्रमेण हव्यकव्ययोर्ग्राह्येत्यर्थः॥ द्विमुहूर्तमित्यनुकल्पः॥

॥शुद्धा विद्धा तिथिः शुद्धा हीना तिथ्यान्यया हानि॰ उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्तकैः॥२८॥ सायं तूत्तरया तद्व
न्न्यूनया तु न विद्यते॥ वेध्यापि त्रिमुहूर्तैव नन्यूना वेधमर्हति॥२९॥ शुद्धायां नास्ति संदेहो दैवे पित्र्ये च कर्मणि॥ उप
वासस्तोकभक्तं नक्तं चायाचितव्रतं॥३०॥ दानं च षड्विधं दैवं क्रमाद्यत्र विविच्यते॰ एकोदिष्टं पार्वणं च पित्र्यं द्विवि
धमीर्यते॥३१॥ शुक्लपक्षे दर्शविद्धा कृष्णे विधा द्वितीयया॰ उपोष्या प्रतिपद्युक्ते मुख्यास्यादपराह्णकी॰ तदभावे तु सायाह्नव्यापिनी

तथा॰ पौर्वाह्णिकास्तु तिथयो दैवे कार्याः प्रयत्नतः इति व्यासवचनात् कूयवचनादपि त्रिमुहूर्तसत्त्वमावश्यकं॰ पूर्वाह्णश्चास्य अह्नः पूर्वो भाग
इति व्युत्पत्त्यादिना पंचभागवचनत्वात् तस्य च पंचधाविभागे त्रिमुहूर्तात्मकत्वात्॰॥२९॥ शुद्धायामिति॰ दिनद्वये सत्वे हि संदेहः॥ तदभावान्न संदे २
ह इत्यर्थः॥ व्रतमिति॰ पूजादिरूपमित्यर्थः॥३१॥ एकोदिष्टमिति॰ एकदैवत्यमित्यर्थः॥ पार्वणं त्रिदैवत्यं॥३२॥ शुक्लपक्ष इति॰ तथा च पैठीनसिः॥ पंचमी
सप्तमी चैव दशमी च चतुर्दशी॥ प्रतिपन्नवमी चैव कर्तव्या सन्मुखी तिथिः॥ सन्मुखत्वं च स्कंदपुराणे विवेचितं॰ सन्मुखी नाम सायाह्नव्या
पिनी दृश्यते यदा॰ प्रतिपत्सन्मुखी कार्या या भवेदपराह्णिकी॰ व्यासोपि॰ प्रतिपत्सैव विज्ञेया या भवेदपराह्णिकी॰ दैवं कर्म तदा ज्ञेयं पित्र्यं वा मनु
रब्रवीत्॰॥३२॥

सायाह्नादयः सावनदिवसस्य भागविशेषा इत्याह॰ प्रातरिति॰ मुख्यः श्रेष्ठः॰ द्वित्र्यादीति॰ द्वेधा त्रेधा चतुर्धेति भागेभ्य इत्यर्थः॥ तथा च सूर्योद
यमारभ्य मुहूर्तत्रयं प्रातर्भागः तदूर्ध्वं मुहूर्तत्रयं संगवः ततो मुहूर्तत्रयं मध्याह्नः ततो मुहूर्तत्रयमपराह्णः ततो मुहूर्तत्रयं सायाह्नः तथा च व्यासः॥ मुहूर्तत्रितयं प्रातः
स्तावानेव तु संगवः॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः॥ सायाह्नस्त्रिमुहूर्तस्तु सर्वधर्मबहिः कृत इति॰ मुहूर्तशब्देन च दिवसस्य पंचदशो भाग उ
च्यते॰ तस्य च दिनवृद्धिह्रासाभ्यां वृद्धिह्रासौ ज्ञेयौ॰ एवं सति यदा प्रतिपद्दर्शदिने अस्तात्पूर्वं त्रिमुहूर्तपरिमिता परेद्युश्च अस्तमयात्प्राक् त्रिमुहूर्तप्रविष्ट
या द्वितीयया विद्धा भवति तदा दर्शविद्धा न ग्राह्या॰ सा च यदि पूर्वदिने अपराह्णेपि यदि वर्तते तदा श्रेष्ठा तदभावे सायाह्नमात्रव्यापिन्यपि ग्राह्येत्यर्थः॥ आवर्तनात्तु पूर्वा

प्रातः संगवमध्याह्नापराह्णाः सायमित्यसौ॰ तत्राह्नः पंचधा भागो मुख्यो द्वित्र्यादिभागतः॥३३॥

ह्णो ह्यपराह्णस्ततः पर इति स्कंदपुराणे द्वेधा विभागो दर्शितः॰ ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्तानां तु पंचकं॰ पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परं॥ अपराह्णस्ततः प्रोक्तो
मुहूर्तानां तु पंचकमिति॰ त्रेधा विभागः शातातपोपि॰ तस्मादह्नस्तु पूर्वाह्णे देवा अन्नमभ्यवहरंति॰ मध्यंदिने मनुष्याः॥ अपराह्णे पितर इति॰ च
तुर्धा विभागमाह गोभिलः॥ पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं तथा॰ आतृतीयादपराह्णः सायाह्नश्च ततः पर इति॰ एते च द्वेधा विभागादयो पंचधो
क्तं तच्चैव ग्राह्याः॥ अन्यच्च तु सर्वत्र पंचधा विभाग एवेति॰ एवं च प्रकृते उपवासे प्रतिपत्पूर्वाविद्धा ग्राह्येति दर्शितं॰ एकादशी तथा ष
ष्ठी अमावास्या चतुर्थिका॰ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति वचनात्॰ यत्तु प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युते
ति॰ तदुपवासेतरविषयं॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभावेपीति॰ पूर्वविद्धायाः प्रतिपदः प्रातरस्तत्वेपीत्यर्थः। संकल्प्य उपवासादेः। ननु प्रातः संकल्प्य येद्विद्धानुपवासव्रतादिकमिति प्रतिपदश्च तत्राभावा
१० त्कथं संकल्पः स्यादिति चेज्ज्योतिःशास्त्ररीत्या प्रातरस्तत्वेपि धर्मशास्त्ररीत्या तत्सत्वात्॰ तथा च देवलः। यां तिथिं समनुप्राप्य अस्तं याति दिवाक
रः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। इति॰ अन्यकर्मस्विति बहुवचनात्सकलदेवकर्मविषये। एवं अत्रास्तमयात्पूर्वं मुहूर्तत्रयव्या
पिनीं तिथिं समनुप्राप्येति वा। सेतं॰ अन्यथा पूर्वविद्धात्वाभावेन उत्तरतिथिरेव ग्राह्यत्वप्रसंगात्॰ अतएव शिवरहस्ये॰ यां प्राप्यास्तमुपैत्यु
र्कः स्यात्सा चेत्स्यात्त्रिमुहूर्तका॰ धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधाः इति॰ ननु खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ

॥ अभावेपि प्रतिपदः संकल्पः प्रातरिष्यते॰ तिथिच्छिन्नयामतो वा कुर्याच्च तिथ्यंते पारणं भवेत्॥ २४॥

परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी इति वचनात् कुतो नानिर्णयः। अयुक्तमिति चेत्॰ मैवं॰ खर्वादिव्यवस्थैकोद्दिष्टादिविषयत्वात्॰ त श्राद्ध
तथाच व्यासः। द्वितीयादिकयुग्मानां पूज्यतानियमादिषु॰ एकोद्दिष्टादिवृध्यादौ ह्रासवृद्ध्यादिचोदने इति॰ नियमादिष्वित्यादिशब्देनपि च्यक
र्मव्यतिरिक्तं व्रतोपवासादिसकलकर्मणो ग्रहणं। एकोद्दिष्टादीत्यादिशब्देन विवाहादिमंगलांगभूतश्राद्धव्यतिरिक्तपार्वणस्य श्राद्ध
स्य॰ वृध्यादावित्यादिशब्देन मांगलिकश्राद्धस्य ह्रासवृध्यादिइत्यादिशब्देन खर्वग्रहणं। खर्वः साम्यं दर्पो वृद्धिः हिंसा क्षयः। तदेवं
पूर्वेद्युः शुद्धप्रतिपदुपवासं कृत्वाऽपरेद्युः पारणं कुर्यात्॰ तच्च तिथ्यंते विहितं॰ तथा च सुमंतुः। तिथिनक्षत्रनियमे तिथिभांते च पारणं॰ अ १०
तोन्यथा पारणे तु व्रतभंगमवाप्नुयात्। इति॰ तत्र विशेषमाह॰ तिथिरिति॰ यामत्रयात्पूर्वं तिथ्यंतलाभे तत्र पारणं। त्रियामादूर्ध्वं ति
थ्यंतलाभे तु प्रातरेव पारणमित्यर्थः। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति वचनात्॰ एवं शुद्धायां पराविद्धायां चोपवासेपि प्रा
तरेव हि पारणं॰ उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत्॰ अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पतीति देवलवचनात्॰ धर्मोयमः॥ तथा तत्कल
लेन कृत्या चेतां निपातेपि उद्दिश्य विहितानि परेद्युस्तत्तिथ्यंते पारणं कार्यं॰ तिथीनामेव सर्वासामुपवासव्रतादिषु॰ तिथ्यंते पार

णं कुर्याद्विना शिवचतुर्दशीमिति स्कंदवचने आदिपदेन एकभक्तादीनामुपादानात्॥ २५॥ बल्युत्सवं चेति॰ पूर्वेद्युः पूर्वविद्धायां प्रतिपदि यो
पवासः क्रियते तथा च बल्युत्सवं च कुर्यादित्यर्थः। बल्युत्सव श्रवणिपूजारूपः कार्तिकशुद्धप्रतिपदि ब्रह्मपुराणादौ विहितो ज्ञेयः॥ मुख्येति॰ मुख्यतिथेः पूर्वविद्धायाः अंतरायेत त्र
कर्माकरणे तिथिशेषोपि परेद्युः पूर्वाह्णे विद्यमानो ग्राह्यः। पूर्वाह्णे वा स्तु तिथयो दैवकार्ये फलप्रदा इत्यादिवचनादिति भावः॥ २६॥ शुद्धसंपूर्णेति॰ शुद्धसंपूर्णासति अधिकाप
रेद्युस्त्रिमुहूर्तोक्षयापि प्रतिपत्पूर्वैव ग्राह्या संपूर्तेः। संपूर्णत्वस्य संभवादित्यर्थः। एकभक्तेति तिथिनिर्णयमाह॥ गृहीतव्येति॰ एकभक्तं च स्कंदपुराणे दर्शितं॰ दिनार्धसमये तीते भुज्य
ते नियमेन यत्। एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि इति॰ अत्र च दिनार्धस्योपरि सार्द्धमुहूर्तपरिमितः कालः पंचधा विभागे मध्याह्नस्यापरभागे एकभक्तस्य मुख्यः कालः दि

बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत्॰ मुख्यतिथ्यंतराये तु तिथिशेषोपि गृह्यतां॥ २५॥ शुद्धाधिका तु क्षयापि पूर्वा सं
पूर्तिसंभवात्॰ गृहीतव्यासैकभक्ते मध्याह्नव्यापिनी तिथिः॥ २६॥ परेद्युरेव पूर्वेद्युरेवं व्याप्तिर्दिनद्वये॰ नोभयत्रोभयत्रांशे
साम्ये वैषम्यमित्यपि॥ २७॥ षट्पक्षास्तेषु चैकैकव्याप्तौ सैवाग्रगृह्यतां॰ दिनद्वयेपि तद्व्याप्त्यभावव्याप्तौ चैकदेशतः॥ २८॥
समव्याप्तौ च पूर्वैव वैषम्ये त्वधिकेष्यतां॥ अन्यांगस्यैकभक्तस्य कालस्त्वंग्यनुसारतः॥ २९॥ उपवासप्रतिनिधेस्तिथिस्यादुपवा

नार्धेतीते समनंतरभावित्वात्॰ अस्तमयात्प्राचीनोऽवशिष्टो गौणः कालः दिवेत्यारभ्य नुज्ञानात्॰ एवं च मध्याह्नस्य कर्मकालत्वात्तद्व्यापिनी तिथिरेकभक्ते ग्राह्या॰ कर्मणो यस्य
यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति वचनात्॰ मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति वचनाच्च॰ अत्र म
ध्याह्नव्याप्तिषड्विधेत्याह॰ परेद्युरेवेति॰ परेद्युरेव मध्याह्नव्याप्तिः। पूर्वेद्युरेव वा॰ उभयत्रापि तद्व्याप्तिः अव्याप्तिर्वा॰ उभयत्र साम्येन तदेकदेशव्याप्तिः। वैषम्ये
ण वेति॰ तेषु पक्षेषु मध्याह्ने एकस्मिन्नेव दिने मध्याह्नव्याप्तौ सैव ग्राह्या॰ इतरपक्षेषु साम्यपर्यंतेषु पूर्वैव॰ गौणकालव्याप्तिलाभात्॰ वैषम्ये तु आधिक्यव्यापिनी
ग्राह्या॰ २७॥ २८॥ अन्यांगस्येति॰ यत्र प्रधानं पूजादिकं मध्याह्ने विहितं तदंगं चैकभक्तं चेत्तत्प्रधानानुसारेणांगभूतस्यैकभक्तस्य प्रधानदिनमेव तदुत्त
रमनुष्ठानं कार्यं॰ उपवासप्रतिनिधित्वेन विहितं चैकभक्तमुपवासतिथौ कार्यमित्यर्थः॥ ॥ इत्येकभक्तनिर्णयः॥ २९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ नक्तं निर्णीयते॰ प्रदोषेति॰ तच्च वाराहपुराणे॰ मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत्॰ तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत्॰ नक्तकालो
भविष्यपुराणे॰ मुहूर्त्तोनं दिनं नक्तं प्रवदंति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिपेति॰ अत्र कालद्वयस्याधिकारिभेदेन व्यवस्था
माह देवलः। नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं॥ यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यत इति॰ स्मृत्यंतरेपि॰ नक्तं निशायां कुर्वीत गृ
हस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं। सदिवाकरं तु तत्प्रोक्तमंतिमे घटिकाद्वयं॰ निशानक्तं तु विज्ञेयं यामार्द्धे प्रथ

११ प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये॥४०॥ अव्याप्तिर्वाथ वा शेष नव्याप्तिस्यात्सर्वथोत्तरा॰ सौरनक्तेषु सायाह्नव्यापिनी न प्रदोषगा॥४१॥

मे सदेति॰ रात्रिनक्तभोजने व्यासः। त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तंगते सति॰ नक्तं तु तत्र कुर्वीत इति शास्त्रस्य निश्चय इति॰ तदे
वं नक्तकालो व्यवस्थितो॰ तच्च नक्तं प्रदोषव्यापिन्यां कार्यं॰ तथाह वत्सः। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा॰ एकादशीं विना सर्वा शुक्ले च कृष्णे तथा सम
तेति॰ एकादश्यां तु यन्नक्तं तत्रोदयव्यापिनी तिथिर्ग्राह्या॰ तदुक्तं स्कंदपुराणे॰ प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पूज्या हरिनक्तव्र
ते तिथिः इति॰ प्रदोषश्च त्रिमुहूर्त्तः स्याद्भानावस्तंगते सति॰ नक्तं तत्र तु कर्त्तव्यमिति शास्त्रस्य निश्चय इति व्यासवचनोक्तः पारिभाषिको ज्ञेयः॥ ११
अत्र पूर्ववत्प्रदोषव्याप्तौ षट् पक्षाः स्युः॰ व्याप्तिर्दिनद्वये इति॰ तत्रैकैकदिनव्याप्तौ संशयाभावात्पक्षद्वयं नोक्तं॰ तत्र दिनद्वयव्याप्तौ जाबा
लिः। सदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति॰ उभयत्रापि दिवारात्रौ च सा तिथिर्विध्यते य
त इत्यर्थः। उभयत्र प्रदोषव्याप्त्यभावेपि परैवेत्याह जाबालिः॥ अतथात्वे परत्र स्याद्दस्तात्सर्वाग्यतो हि सेति॰ अतथात्वे॰ उभयत्र प्रदोषव्याप्त्यभा

वे तेन सायाह्नव्याप्तिर्गौणकल्पः इत्यभिप्रायः। एवं च गृहस्थोप्येतादृशविषये दिवा नक्तमाचरेत्॰ प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते॰ आत्मनो द्वि
गुणच्छायामतिक्रामति भास्करे॰ तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनं॰ एवं ज्ञात्वा ततो विद्वान्सायाह्ने तु भुजिक्रियां॰ कुर्यान्नक्ते व्रती नक्तं फलं भवति निश्चितमि
ति॰ यत्तु सप्तमीभानुवासरादौ रविनक्तं विहितं तत्र पूर्वोक्तविपर्ययेण सायंकालव्याप्तिर्मुख्यः कल्पः। अत एव सुमंतुः॥ त्रिमुहूर्त्तस्पृगेवाह्नि निशि चैतावती
तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति॰ अत्र सायंव्याप्तेर्मुख्यकालत्वात्प्रथमतो निर्देशः। प्रदोषव्याप्तेरनुकल्पत्वात्पश्चान्निर्देशः। यत्र
तु रविवारादौ रात्रिभोजननिषेधः तत्र गृहस्थोपि दिवैव नक्तं कुर्यात्॰ तथा च भविष्यत्पुराणे॰ येत्वादित्यदिने ब्रह्मन्नक्तं कुर्वंति मानवाः। दिनांते
तेपि भुंजीरन्निषेधाद्रात्रिभोजन इति॰ अस्मिंश्च दिवाभोजने उत्तमोंतिममुहूर्त्तो मध्यमः। उपांत्यस्ततः प्राचीनो जघन्यः। एवं च सत्यंतिमभागस्त्रिमुहूर्त्तं च यत्नान्नुप
पद्यते॰ रात्रिभोजनेपि घटिकाद्वयमुत्तमकालः। घटिकाषट्कं मध्यमकालः। अत्राप्यन्यांगे उपवासस्थानीये च पूर्ववदेव निर्णयः। तथा रथसप्तमी
व्रते तृतीयादिषु सप्तम्यंतेषु पंचसु दिनेषु क्रमेणैकभक्तनक्तायाचितोपवासपारणानि विहितानि॰ तत्र यदा तृतीया यामत्रय
परिमिता तत ऊर्ध्वं चतुर्थी तदा एकभक्तनक्तयोरेकस्मिन्दिवसे प्राप्तौ प्राथम्यादेकभक्तस्य मुख्यकालेऽनुष्ठानम्॰ न
क्तस्यानुकल्पः। स च द्विविधः। दिनांतरानुष्ठानात्कर्त्रंतरानुष्ठानाच्च॰ यदा तु चतुर्थी परेद्युर्व्याप्य सायंकालं व्याप्नोति
तदा तस्य गौणत्वादेकस्यैव कर्त्तुर्दिनभेदेन व्रतद्वयमनुतिष्ठेत्॰ यदा च तुर्थी समाक्षीणा वा तदा गौणकालस्याप्यसंभ
वेन पूर्वेद्युरेव भार्यापुत्रादिना कर्त्रंतरेण तन्नक्तं कारणीयम्॰॥ इति नक्तनिर्णयः॥ ॥श्रीगणेशांबिकागुरवे नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयाचितेतिति॰ अयाचितंतुयाचितभोजननिषेधरूपं॰ याचितभिन्नभोजनरूपं वा॰ तच्चाद्यपक्षे गौतम आह॥ अयापरं च्यहं नक्तं चनयाचितेति॰ द्वितीयंतुबृहस्पतिराह॰ च्यहं प्रातस्त्र्य
हं सायं च्यहमद्यादयाचितमिति॰ उभयत्रापुपवासवत्तिथिर्ग्राह्येत्यर्थः। सोदयेति॰ उदयमारभ्य त्रिमुहूर्तवर्तमानायामित्यर्थः। तदाह व्यासः। पौर्वाह्णिकास्तुतिथयो दैवे कार्ये फलप्रदा
इति॰ ॥४२॥ उभयत्रेति॰ दिनद्वये पूर्वाह्णव्याप्तौ पूर्वेद्युस्तदनुष्ठानं॰ परत्रैव तद्व्याप्तौ तिथिक्षये पूर्वा॰ साम्ये च व्याप्त्योस्तु परा॰ दिनद्वयेपि पूर्वाह्णव्याप्तौ एकदेशव्याप्तौ च पूर्वाग्राह्येति दानव्रतानि
र्णयः॥ अथापि त्र्यंनिर्णीयते॰ एकोद्दिष्टेति॰ एकमुद्दिश्य क्रियमाणं श्राद्धमेकोद्दिष्टं॰ त्रीनुद्दिश्य क्रियमाणं पार्वणं॰ तदाह कात्यः॥ एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितं॰ त्रीनुद्दिश्य

१२ अयाचितेतुतिथयः स्वीकार्या उपवासवत्॰ सोदयास्त्रिमुहूर्ता या कुर्याद्दानं व्रतानि च॥४२॥ उभयत्र तथा सेतु पूर्वेद्युस्तदनुष्ठितिः॥
परत्रैव तथा स्यं चेत्पूर्वा ग्राह्या तिथिक्षये॥४३॥ तिथिः साम्ये च वृद्धौ च ग्राह्यतां तिथिरुत्तरा॰ अस्पर्शे चैकदेशस्य व्याप्तौ पूर्वैव गृह्य
तां॥४४॥ एकोद्दिष्टेतु मध्याह्नयुक्तास्याद्देवभक्तवत्॰ एकदेशसमव्याप्तौ क्षये पूर्वान्यथोत्तरा॥४५॥ कुतपाद्यपराह्णांतव्याप्तिराद्विरुत्तमा॰

तुयत्तद्धि पार्वणं मुनयो विदुरिति॰ तत्रैकोद्दिष्टे मध्याह्नव्यापिनी पार्वणे च अपराह्णव्यापिनी तिथिर्ग्राह्या॰ तथा च गौतमः॥ मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे
तिथिर्भवेत्॰ अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् इति॰ हारीतोपि॰ आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे॰ पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमि
त्तकमिति॰ मध्याह्नश्च सप्तमाष्टमनवममुहूर्तात्मकः॥ तत्रैवैकदिने मध्याह्नव्याप्तौ न संदेहः॥ दिनद्वये तद्व्याप्तौ पूर्वा॰ अपराह्णः पितॄणां हि या परा १२
ह्णानुयायिनी॰ सा ग्राह्या पितृकार्ये तु न पूर्वाह्णानुयायिनीति हारीतवचनात्॰ यस्यामस्तं रविर्याति पितरस्तामुपासते॰ इति ब्रह्मन्मनुवचना
च्च॰ एकदेशइति॰ क्षयेति तिथिक्षये॰ अन्यथा वृद्धिसाम्ययोः॰ वैषम्येणैकदेशव्याप्तौ साधिक्यव्यापिनी ग्राह्या॰ पार्वणे निर्णयमाह॰॥४५॥ कुतपादि
इति॰ अष्टमे भास्करो यस्मान्मंदीभवति सर्वदा॰ तस्मादनंतफलदस्तत्रारंभो विधीयते॰ ऊर्ध्वं मुहूर्तात्कुतुपाद्यन्मुहूर्तचतुष्टयं॰ मुहूर्तपंच
कं ह्येतत्स्वधाभवनमिष्यते इति मात्स्यात्॰॥

३ × तिथि तेभ्यो ह्यतोदत्तो ह्यपराह्णः स्वयंभुवा ×३

उपवासविषये चं च ... रस्थष्टमी षष्ठी द्वितीया च चतुर्दशी॰ त्रयोदशी चतुर्थी च उपोष्याः स्युः परान्विता इति वचनाद्वैयं॰ ततोपराभिन्ना पूर्वविद्धा ग्राह्या॰ सा पया॰ पूर्वेद्युरुदयमारभ्य प्रवृत्ता द्वितीया दि
नेपि ... ह्यवैव॰ संपूर्णत्वे संदेहाभावात्॰ तथा परेद्युस्त्रिमुहूर्तामिता या अभावेपि पूर्वैवेति सेयं॰ =१५ क्षय

तदभावइति॰ मुहूर्तपंचकव्याप्त्यभावइत्यर्थः। पित्र्ये चापराह्णिकीति सामान्यवचनादिति भावः॥४६॥ क्षयइति॰ उभयत्रापराह्णव्याप्तौ तदभावे एकदेशसमव्याप्तौ च क्षये पूर्वा॰ पक्षांतरे साम्ये वृद्धौ
पिन्य परेत्यर्थः॥ अपराह्णव्याप्तौ तस्य यदा तिथिः क्षये पूर्वा च कर्तव्या वृद्धौ कार्या तथोत्तरेति बोधायनवचनात्॰ नग्राह्येति॰ अपराह्णव्याप्तेः तिथिवृद्धिनियतत्वेन ग्राह्या तिथिक्षयासंभवा
दिति भावः॥ वृद्धिवदेव साम्येपि परेवेत्याह॥ साम्येत्विति॰ उभयत्रापराह्णव्याप्त्यभावे निर्णयमाह॰ नस्पृशेति॰ तदाह मनुः॥ नचाह्नव्यापिनी चेत्स्यान्मृता हेतुयदा तिथिः॥ पूर्वा विद्धैव क
र्तव्या त्रिमुहूर्ता भवेद्यदीति॰॥४८॥ वैषम्येणेति॰ तथा च मरीचिः॥ अपराह्णव्यापिनी चेद्दर्शेकस्य यदा तिथिः॥ महती प्रचता हि दृष्ट्वा प्रशंसंति महर्षय इति॰ एकदेशे साम्ये नोभयत्रव्या

तां तदभावेपराह्णस्य व्यापिका ग्राह्या तिथिः॥४६॥ क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः॥ नग्राह्या तिथिगौर्वृद्धिक्षयाद्र्घ्यातिथे
स्तु तौ॥४७॥ साम्येतूर्ध्वतिथिर्ग्राह्यापरा विद्धैव वृद्धिवत्॰ नस्पृशत्यपराह्णो चेत्पूर्वा स्यात्कुतपो यया॥४८॥ वैषम्येणै
कदेशस्य व्याप्तौ ग्राह्या महत्ततः॥ साम्ये चैनत्क्षये पूर्वा परा स्याद्वृद्धिसाम्ययोः॥४९॥ वृद्धिसाम्यक्षयाग्राह्यातिथिनागो
ष्ठ्यंगाइह॰ द्वितीयाद्यास्तु पर्वांतास्तुर्यप्रकरणोदिताः॥५०॥ संचारणीयः सामान्या तिथिषु प्रतिपन्नयः॥ क्वाचित्काचिद्विशेषोस्ति
सोयमत्राभिधीयते॥५१॥ पूर्वेद्युरस्ततो प्रातः परेद्युस्त्रिमुहूर्तगा॰ सा द्वितीया परोपोष्या पूर्वाविद्धा ततोपरा॥५२॥

सोत्राह॰ साम्येनेति॰ स्वर्वांदर्पइत्यादिवाक्यादित्यर्थः॥४९॥ इति माधवीयकारिकाविवरणे प्रतिपन्निर्णयाख्यं तृतीयं प्रकरणं॥ चतुर्थप्रकरणविषयमाह॰ द्वितीयेति॰ तत्र प्रति
पदियोनयः निर्णयः पूर्वमुक्तः स एव समानत्वात् उत्तरासु सर्वतिथिषु संचारयितव्य इत्याह॰॥५०॥ संचारणीयइति॰ अत्रेति॰ अस्मिन्प्रकरणइत्यर्थः॥५१॥ पूर्वेद्युरिति॰ युग्माग्नि
युगभूतानां षण्मुन्योर्वसुरंध्रयोः॥ रुद्रेण द्वादशीयुक्ता चतुर्दश्या तु पूर्णिमा॰ प्रतिपद्यप्यमावस्या तिथ्योर्युग्मं महाफलं॰ एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति॰ युग्मं द्वितीया॰
अग्निस्तृतीया॰ युगं चतुर्थी॰ भूतं पंचमी॰ षट् षष्ठी॰ मुनिः सप्तमी॰ वसुरष्टमी॰ रंध्रं नवमी॰ रुद्र एकादशी॰ अत्र युग्माग्न्यादिसप्तयुग्मेषु पूर्वतिथिरुत्तराग्राह्या॰ उत्तरा तु पू
र्वविद्धा युक्ता भवति॰ एवं च द्वितीया तृतीयाविद्धा ग्राह्येत्यर्थः॥ यदापि पूर्वेद्युः पूर्वाह्णैकदेशमारभ्य परेद्युस्त्रिमुहूर्ता सापि पूर्वैव॰ प्रतिपत्संमुखी कामीया भवे
दापराह्णिकी॰ पौर्वाह्णिकी च कर्तव्या द्वितीया तादृशी विभो इति स्कांदात्॰ इति द्वितीयानिर्णयः॥ ५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीयानिर्णयमाह॰ रंभेति॰ रंभाव्रतं च॰ भद्रे कुरु षयत्नेन रंभाख्यं व्रतमुत्तमं॰ ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेति स्कांदे उक्तं॰ तत्र तृतीया पूर्वविद्धा ग्राह्या॰ बृहत्तपा
तथा रंभा सावित्री वटपैतृकी॰ कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिरिति तिन्नैवोक्तेः॥ व्रतांतरे तु॰ तृतीया च चतुर्थीयुता ग्राह्या॰ रंभाख्यां वर्जयित्वा तु तृतीयां द्विज
सत्तम॰ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्तात्॰ गणो गणेशः तद्दैवत्या चतुर्थी तद्युक्तेत्यर्थः॥ अत्र च द्वितीयावेधो कलामात्रोपि निषिद्धः॥
१३ चतुर्थीयोगश्च कलामात्रोपि ग्राह्यः॥ कलाकाष्ठापि वा चैव द्वितीया परदृश्यते॰ सा तृतीया न कर्तव्या कर्तव्या गणसंयुतेति स्कांदात्॰ द्वितीयाशेषसंयुक्तां तृ

रंभा तृतीया पूर्वा स्यादुत्तरा स्याद्व्रतांतरे॰ परे दिने नास्ति चेत्पूर्वविद्धाप्यस्तु व्रतांतरे॥५३॥ मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे॰ शुद्धाधिकाया मप्येवं गणयोगप्रशंसनात्॥५४॥ चतुर्थी तु परोपोष्या गणनाथव्रतस्य तु॰ मध्याह्नव्यापिनी पूज्या तद्वन्नागचतुर्थ्यपि॥५५॥ परेद्युरेव मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा॰ अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः॥५६॥ पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्वप्रियातिथिः॥ नो चेत्सर्पस्य पंचम्यायोगात्सेतं प्रशस्यते॥५७॥ गौर्याः शुद्धजयाप्यस्तु नागविद्धा निषिध्यते॥

तीयां कुरुते तु यः॥ स याति नरकं घोरं कालसूत्रं भयंकरं॥ द्वितीयाशेषसंयुक्तां या करोति विमोहिता॰ सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति निंदार्थवादो दोषश्र
वणाच्च॰ एतच्च गौरीव्रतपरं॰ तथा शिष्टाचारात्॰ व्रतांतरे तु त्रिमुहूर्तवेधः परावत्सेयः॥ तदाह॰ ५३ मुहूर्तमात्रेति॰ शुद्धाधिकायामिति॰ एवं परा ग्राह्येत्यर्थः॥
इति तृतीयानिर्णयः॥ ५५ चतुर्थीति॰ युग्मवाक्यादिति भावः॥ ५५ तथा दर्शीतपाषष्ठी अमावास्या चतुर्थिका॰ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति बृहद्वसिष्ठवचनाच्च॰ द्वितीया पंचवेध्याद श्री
ष्टमी च त्रयोदशी॰ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी॰ इति वचनं तु पराविद्धानिषेधकं॰ तत्रेयं व्यवस्था॰ विनायकनागगौरीव्रतातिरिक्तेषु परा॰ विनायकादिव्रते तु मध्याह्न
व्याप्ति निर्णयात्कदाचित्पूर्वेद्युः प्राप्तौ तद्विषये पंचमीविद्धानिषेधो व्यवस्थाप्यः॥ विनायकव्रते मध्याह्नव्याप्तिमाह बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते॰ मध्याह्नव्यापिनी चेत्स्यात्प
रतश्चापरेहनीति॰ नागव्रतेपि॰ युग्मं मध्यंदिने पंचतत्रोपोष्य फणीश्वरानिति वचनान्मध्याह्नव्यापित्वं द्रष्टव्यं॰ ५६ पूर्वेद्युरेवेति॰ तद्व्याप्तौ॰ मध्याह्नव्याप्तौ॰ नो चेदिति॰ पक्षांतरेपीत्यर्थः॥
चतुर्थी पंचमी विद्धा नागप्रीतिविवर्द्धिनी॰ प्रीतास्युः पूजितास्तस्यां नागास्तां तत्र पूजयेदिति वचनादिति भावः॥ ५७ गौर्येति॰ जया चमर्दिसंपूर्णा चतुर्थी ह्रसते पुनः॥ जयासैव हि कर्तव्या नागवि
द्धेनतायेद्धेति वचनादित्यर्थः॥ इति चतुर्थीनिर्णयः॥

पंचमीनिर्णयमाह॰ सर्वत्रेति॰ युगभूतानामिति युग्मवाक्यादित्यर्थः॥ चतुर्थीसंयुता कार्या पंचमी परया न तु॰ दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति वचनाच्च॰ पंचमी
तु प्रकर्तव्या षष्ठ्या युक्ता तु नारदेति वचनं तु स्कंदोपवासविषयं॰ स्कंदोपवासे स्त्री कार्या पंचमी परसंयुतेति वाक्यशेषात्॰ इति पंचमीनिर्णयः॥ ५८ षष्ठीनिर्णयमाह॰ ना
गविद्धेति॰ तथा च वाशिष्ठः॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॰ एताः पूर्वयुता कार्या स्तिथ्यंते पारणं भवेदिति॰ सा निषिद्धेति॰ तथा च निगमः॥ नागवि
द्धा तु या षष्ठी [redacted] रुद्रविद्धो दिवाकरः॥ कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु वासरा इति॰ रुद्रः

सर्वत्र पंचमी पूर्वा ग्राह्या स्कंदव्रते परा॰ ५८॥ नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतांतरे॰ उत्तरस्या अलाभे तु नागविद्धापि गृह्यतां॥५९॥ विना द्वादशभिर्नाडीभिर्नागवेधो न दोषकृत्॰ सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि॰ ६०॥ अलाभे पूर्वविद्धायाः पराविद्धापि गृह्यतां॰ व्रतमात्रेष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा॥६१॥ दूर्वाष्टमी च शुक्लापि पूर्वविद्धा विधीयते॰ पक्षद्वयेप्युत्तरैव शिवशक्तिमहोत्सवे॥६२॥

अष्टमी॰ दिवाकरः सप्तमी॰ कामस्त्रयोदशी॰ विष्णुर्द्वादशी॰ एवं च सति षण्मुन्योरिति युग्मवाक्यादपि व्रतांतरे परा ग्राह्या॰ ५९ नागवेधश्च षण्मुहूर्तपरिमितो बो
ध्यः॥ नागो द्वादशनाडीभिर्दिक्पंचदशभिस्तथा॰ भूतो द्वादशनाडीभिर्दूषयत्युत्तरां तिथिमिति स्कांदादित्यभिप्रेत्याह॰ विनेति॰ इति षष्ठीनि
र्णयः॥ सप्तमीनिर्णयमाह॰ सप्तमीति॰ षण्मुन्योरिति युग्मवचनात्॰ षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी॰ सप्तमीपरविद्धा तु नोपोष्या तिथि
पंचकमिति वचनाच्च॰ इति सप्तमीनिर्णयः॥ ६० अष्टमीनिर्णयमाह॰ व्रतमात्रेति॰ कृष्णपक्षेष्टमी या च कृष्णपक्षे चतुर्दशी॰ पूर्वविद्धा तु कर्तव्या परविद्धा
न कर्हिचित्॰ उपवासादिकार्येषु ह्येष धर्मः सनातन इति निगमवचनात्॰ शुक्लाष्टमी तु वसुरंध्रयोरिति युग्मशास्त्रात्॰ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्द
शी॰ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति निगमवचनाच्च परा॥ ६१ दूर्वाष्टमीति॰ श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या॰ पूर्वविद्धैव कर्तव्या शिवरा
त्रिर्बलेर्दिनमिति पाद्मवचनादित्यर्थः॥ पक्षद्वय इति॰ शुक्ले कृष्णे चेत्यर्थः॥ अष्टमीनवमीविद्धा नवम्या चाष्टमीयुता॰ अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः॥ अष्ट
मीनवमीयुग्मे महोत्साहे महोत्सवः॥ शिवशक्त्योः शिवश्चैव पक्षयोरुभयोरपीति पद्मपुराणात्॥ ६२॥ धर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्येष्ठर्क्षेति॰ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॰ यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनं॰ इति स्कांदे॰ ज्येष्ठाव्रतमुक्तं॰ तत्र कृष्णाष्टमीनक्षत्रवशात्पूर्वेत्यर्थः न
क्षत्रयोगाभावे तु शुक्लत्वात्परैवे॰ मध्याह्नेति॰ यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः॥ तस्मिन्नह्नि विष्णुपूजा च न्यूना चेत्पूर्ववासर इति स्कांदादित्यर्थः॥ ज्ये
ष्ठर्क्षेति॰ नभोष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च॰ नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकेति स्कांदादित्यर्थः॥ जन्माष्टमीनिर्णयमाह॰ जयंत्याख्यामिति॰
जयंतीजन्माष्टमीति नामभेदात्तु रोहिणीनक्षत्राष्टमीतिथिरूपनिमित्तभेदाच्चेति भावः॥ एवं दानादिसहितोपवासः पूजाप्रकारविशेषयुक्तो जयंतीव्रतस्वरू

१४ ज्येष्ठर्क्षयोगे पूर्वैव ग्राह्या ज्येष्ठाव्रते तिथिः॥ मध्याह्नादूर्ध्वमृक्षं चेत्परेद्युः सा प्रशस्यते॥ ६३॥ ज्येष्ठर्क्षभानुवाराभ्यां युक्ताष्टम्यतिदुर्ल
भा॰ जयंत्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात्॥ ६४॥ शुद्धा च सप्तमीविद्धा सैवं जन्माष्टमी द्विधा॰ सप्तमी चेन्निशीथात्प्राक्
विद्धा स्याच्छुद्धान्यथा भवेत्॰ ६५॰ शुद्धायां नास्ति संदेहो विद्धा चात्र विवेच्यते॰ निशीथयोगः पूर्वेद्युरुत्तरेद्युर्द्वयोरुत॰ ६६॰ पूर्वैव प्रथ
मे पक्षे परैवोत्तरपक्षयोः॥ अष्टमी रोहिणीयुक्ता जयंती सा चतुर्विधा॰ ६७॥ शुद्धा शुद्धाधिके सैवं विद्धा विद्धाधिकेति च॰ शुद्धायाम
पि विद्धायां न संभाव्योत्तरा तिथिः॥ ६८॥ शुद्धाधिकायां योगश्चेदेकस्मिन्वा दिनद्वये॰ नैकयोगेऽस्ति संदेहो द्वियोगे प्रथमं दिनं॰ ६९॰
सदा निशीथे पश्चाद्वेत्युत्तमो मध्यमोऽधमः॥ योगस्त्रिधापि पूर्वेद्युः संपूर्णत्वादुपोषणं॥ ७०॥ विद्धाधिकायामप्येकदिनयोगे समग्रता॰ द्वयो
र्योगस्त्रिधा भिन्नो निशीथे च त्रिभेदतः॥ ७१॥ तद्व्याप्तिर्दिनरात्र्योः कस्मिन्नुभयोर्नोभयोरिति॰ एकस्मिन्नेव तद्दिनं स्यात्पक्षयोरंत्ययोः परं॰
बुधे सोमे जयंती चेद्दूरे सातिफलप्रदा॰ तिथ्यृक्षयोर्द्वयोरंते उत्तमं पारणं भवेत्॰ ॥७३॥ एकस्यांते मध्यमं स्याद्द्वयोरंते धमं स्मृतं॰ १४
यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा॰ अंतर्भूता जयंत्यां स्यादृक्षयोगप्रशस्तितः॥

पं॰ उपवासमात्रस्वरूपे च जन्माष्टमीव्रतमिति॰ ॥६४॥ निर्णयवक्तुर्भेदानाह॰ शुद्धे चेति॰ वेधे विशेषमाह॰ सप्तमी चेदिति॰ यद्यपि द्विविधवेधः पूर्वमुक्तः तथा
पि रात्रिप्रधाने कर्मणि रात्रिवेधोऽपि भवति॰ अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा॰ नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यत इति बोधायनवचना दि

दिति भावः॥ अत्र चार्धरात्रस्य मुख्यकालत्वमुक्तं वसिष्ठसंहितायां॰ अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि॰ मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयमिति॰ अयं च
वेधो ग्राह्याया अष्टम्या उच्यते॰ तथा च विष्णुधर्मोत्तरे॰ रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी॰ सप्तम्यामर्धरात्राधः कलयापि यदा भवेत्॰ तत्र जातो जगन्नाथः कौ
स्तुभी हरिरीश्वरः॥ तमेवोपवसेत्कालं तत्र कुर्याच्च जागरं इति॰ अर्द्धरात्रेति॰ निशीथपदाभ्यां च रात्रेरष्टममुहूर्तो मध्यगतोऽभिधीयते॰ तत्र सकलमुहूर्तव्याप्तिर्मु
ख्या॰ घटिकामात्रव्याप्तिस्तु मध्यमा॰ कलाव्याप्तिरधमा प्रागुदाहृता॰ मध्यमोत्तमपक्षद्वयं तु योगीश्वर आह॰ अर्द्धरात्रादधश्चोर्ध्वमेकार्द्धघटिकान्विता॰ रो
हिणी चाष्टमी ग्राह्या उपवासव्रतादिषु इति॰ एका चार्धघटिका एकार्धघटिका ताभ्यामन्विता॰ कलामपेक्ष्यार्धघटिका स्थूला॰ तामपेक्ष्य घटिका
स्थूला॰ तत्रायमर्थः संपद्यते॰ पूर्वभागावसाने एका घटिका उत्तरभागादौ चैका तां मिलित्वा तन्निशीथशब्दवाच्यं मुहूर्तं॰ तावत्परिमाणं सर्वै
रपि सुलक्ष्यत्वान्मुख्यः कल्पः॥ तदसंभवे द्विघटिकान्वेष्टव्या॰ तस्याप्यसंभवे कलेति॰ अत्र च जयंत्यां चंद्रार्घ्यस्यावश्यकर्तव्यत्वात्तस्य च
चंद्रोदयकालीनत्वात्॥ निशीथयोगः प्रशस्तः॥ तदेवाह विष्णुधर्मोत्तरेऽभिहितं॰ अर्धरात्रे तु योगोयं तारापत्युदये तथा॰ नियतात्मा शु
चिः स्नातः पूजां तत्र प्रवर्तयेदिति॰ निशीथयोगादिति॰ प्रथमपक्षे॰ पूर्वेद्युरेव निशीथयोगे॰ उत्तरपक्षयोः॥ पूर्वेद्युरेव द्वयोर्वा॥ निशीथयोगे॰ ६६॰ रोहि
णीयुक्तायाः अष्टम्या भेदानाह॰ अष्टमीति॰ तत्र भेदद्वये न संदेह इत्याह॰ शुद्धायामपीति॰ ६८॰ योगश्चेदिति॰ रोहिणीयोगश्चेदित्यर्थः॥ आद्ये
न संदेह इत्याह॰ नैकयोग इति॰ तथा च यस्मिन्नेव दिने यो रोहिणीयोगः सैव ग्राह्येति॰ द्वियोगे॰ द्वयोर्दिनयो रोहिणीयोगे॰ प्रथममिति॰ सं
पूर्णत्वादित्यर्थः॥ ६९॥ योगस्त्रिविध इत्याह॰ सदेत्यादि॰ अहोरात्रे इत्यर्थः [illegible]॥ निशीथे॰ अर्धरात्रे॰ पश्चान्निशीथानंतरं॰ एवं योगं
त्रैविध्येपि पूर्वमेव दिनं ग्राह्यं॥ ७०॥ चतुर्थपक्षे आह॰ विद्धाधिकायामपीति॰ एकदिनयोगे॰ एकदिनयोग इत्यर्थः॥ स एव योगो ग्राह्य
तामित्यर्थः॥ दिनद्वययोगं विभजते॰ त्रेधेति॰ ॥७२॥ तदेवाविष्करोति॰ तद्व्याप्तिरिति॰ एकस्मिन्नेव दिने विद्धाधिकायाः निशीथे रोहिणी
योगस्तदेव दिनं ग्राह्यमित्यर्थः॥ अंत्ययोरुभयोर्नोभयोरिति पक्षयोः परं दिनमित्यर्थः॥ अत्र क्रमेण वचनानि॰ तत्र निशीथव्याप्तिन्याः ज्ञापकं [illegible] ख्यावायदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारा चौनास्ति चेद्रोहिणी कला। रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति वचनाद्वगंतव्यं। रोहिणीयोगश्च मुख्यो निर्णायकः। प्राजापत्यर्क्षसंयुता कृ
ष्णा नभसि चाष्टमी। मुहूर्तमपि लभ्येत सोपोष्या सा महाफलेति विष्णुरहस्यात्। विनाऋक्षेण कर्तव्या नवमीसंयुताष्टमी। कार्या विद्धापि सप्तम्या
रोहिणीसहिताष्टमीति पुराणवचनाच्च। ७२। बुधे सोमइति। प्रेतयोनिंगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता।
१५ किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पद्मपुराणादित्यर्थः। पारणनिर्णयमाह। तिथ्यर्क्षयोरिति। तथा ब्रह्मवैवर्ते।
अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित्। हन्यात्पुरा कृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्रयत्नतः कुर्यात्तिथि
भांते च पारणमिति। स्कंदपुराणेपि। तिथिनक्षत्रनियमे तिथिभांते च पारणं। अतोन्यथा पारणे तु व्रतभंगमवाप्नुयादिति। तिथिभांतश्च द्विविधः।

नवमी पूर्वविद्धैव पक्षयोरुभयोरपि॥७५॥ मध्याह्ने रामनवमी पुनर्वसुसमन्विता। माघाने वाष्टमीयुक्ता सनत्रापि वैधवैः॥७६॥ कृष्णा पूर्वोत्तरा शुक्ला दशा
म्येवं व्यवस्थिता।

उभयांतः एकतरांतश्चेति। तत्रोभयांतो मुख्यः। एकतरांतो गौणः। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। पारणं तु न कर्तव्यं यावन्नैकस्य संक्षय इति नारदीयात्। रा
त्रावुभयांतलाभे। तिथ्यर्क्षयोर्यदाच्छेदो नक्षत्रांतमथापि वा। अर्धरात्रेपि वा कुर्यात्पारणं त्वपरेहनीति। तथा न रात्रौ पारणं कुर्यादन्यत्र वै रोहिणीव्रतात्। तत्रानि
श्यपि तत्कुर्याद्वर्जयित्वा महानिशामिति वचनात्। अत्रास्तु प्रातरेव पारणं कुर्यात्। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति स्मरणात्। उत्सवश्च पूजाजागरणरूपः।
तस्यांतः प्रातःकाल इत्यर्थः। वर्षे वर्षे इति। जयंत्याख्यः अष्टमीरोहिणीरूपः॥७४॥ अंतर्भूतेति। जयंतीव्रतानुष्ठानेनैव चरितार्थं इत्यर्थः। कुतस्तत्राह। कृत इति। जन्माष्ट १५
म्या अपि रोहिणीयोगे नैव गतार्थत्वेत्यर्थः॥ इत्यष्टमीप्रकरणं॥ नवमीनिर्णयमाह। नवमीति। वसुरंध्रयोरिति युग्मवाक्यात्। अष्टम्या नवमी विद्धा नवम्या चाष्टमीयु
ता। अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिरिति निर्णयामृताच्च॥७५॥ मध्याह्न इति। रामनवमी चैत्रशुक्लनवमी मध्याह्नव्यापिनी पुनर्वसुनक्षत्रयुता ग्राह्या। चैत्रशुक्ले तु नवमी पुनर्वसुयुता
यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवेदिति वचनात्। अत्र मध्याह्नव्याप्तिर्मुख्या निर्णायिका। पुनर्वसुयोगस्तु प्राशस्त्यमात्रं। तेन मध्याह्नव्याप्तिर्दिनद्वये सत्त्वे उभयत्रा
सत्वे च पुनर्वसुयोगो निर्णायकः। वैधवैरिति। अष्टमीविद्धा त्याज्या। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोषणं नवम्यां वै दशम्यां पारणं भवेत् इति वचनात्॥७६॥ दशमीनिर्णयमा
ह। कृष्णेति। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति वचनात्। तेन परविद्धानिषेधः कृष्णपक्षदशमीविषयः॥ इति दशमीनिर्णयः॥

एकादशीनिर्णयमाह। जयंतीव्रतवदिति। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति गरुडपुराणे नित्यमित्यभिधानात्। न करोति हि यो मूढ एकादश्या
मुपोषणं। स नरो नरकं याति रौरवं तमसावृतमिति सनत्कुमारवचनाच्च। तथा विष्णुरहस्ये। यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः। एकादश्यां न
भुंजीत पक्षयोरुभयोरपीति फलश्रवणाच्च नित्यकाम्योभयरूपं एकादशीव्रतमित्यर्थः॥७७॥ अरुणोदय इति। उदयात्प्राक्चतस्रघटिका अरुणोदय इत्युक्तोरुणोदयस्त स्तु
च दशमीप्रवेशो अरुणोदयवेधो भवति। सूर्योदये तत्प्रवेशो सूर्योदयवेधः॥७८॥ वैष्णवलक्षणमाह। वैखानसागमोक्तदीक्षां प्राप्तो हि वैष्णव इति। तथा च स्कांदे।

जयंतीव्रतवन्नित्यं काम्यं चैकादशीव्रतं॥७७॥ अरुणोदयवेधोत्र वेधः सूर्योदये तथा। उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः
क्रमात्॥७८॥ कलाकाष्ठादिवेधोपि ग्राह्यो नात्रिमुहूर्तवत्। वैखानसागमोक्तदीक्षां प्राप्तो हि वैष्णवः॥७९॥ विद्धा त्याज्या वै
ष्णवेन शुद्धाप्याधिक्यसंभवे। एकादशीद्वादशीवाधिका चेत्त्याज्यतां दिनं॥८०॥ पूर्वं ग्राह्यं वैष्णवं स्यादिति वैष्णवनिर्णयः॥ ॥

परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी। तथा च वैष्णवेनारुणोदयविद्धा न कार्या। दशमीवेधसंयुक्तो यदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवे णो
न तद्दिने कादशीव्रतमिति गरुडपुराणात्। सूर्योदयवेधस्तु तद्व्यतिरिक्तस्मार्तविषयः। उदये परेविद्धा तु दशम्येकादशी यदा। दानवेभ्यः प्रीणनार्थं दत्त
वान्पाकशासन इति स्कंदवचनात्। अत्र न पूर्ववत् त्रिमुहूर्तवेधः। किंतु कलाकाष्ठादिवेधोपि। कलार्द्धेनापि विद्धा स्याद्दशम्येकादशी यदा। तदाप्ये
कादशीं हित्वा द्वादशीं समुपोषयेत् इति वचनात्। तत्र विद्धा वैष्णवेन सर्वथैव त्याज्या॥७९॥ शुद्धायामप्याह। शुद्धापीति। आधिक्यं चात्र त्रि
विधं। एकादशीमात्राधिक्यं। द्वादशीमात्राधिक्यं। उभयाधिक्यं चेति। आधिक्यं नाम द्वितीयदिने सूर्योदयसत्त्वं। तत्र प्रथमपक्षे नारद आह। संपू
र्णैकादशी यत्र द्वादश्यां च द्विगामिनी। द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति। द्वादश्याधिक्ये व्यासः। एकादशी यदा लुप्ता परतो द्वादशी भवे
त्। उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति। उभयाधिक्ये गुरुराह। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। तत्रोपोष्या द्वितीया तु परतो
द्वादशी यदीति उभयाधिक्यरहिता या तु शुद्धा या न कोपि संदेहोस्ति। इति वैष्णवनिर्णयः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथस्मार्तानिर्णयः। तत्र शुक्लपक्षे एकादश्याधिक्यं द्वादश्याधिक्यं उभयाधिक्यमनुभयाधिक्यं चेति। एकादशीति। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा।
तत्रोपोष्या परा पुण्या परतो द्वादशी यदीति गरुडपुराणात्॥८१॥ एकादशीमात्रेति। प्रथमे ह्यनि संपूर्णा व्याप्याहोरात्रं संपूर्णा। द्वादश्यां च तथा तात
१६ दृश्यते पुनरेव च। पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति स्कंदपुराणात्॥८२॥ द्वादशीमात्रेति। न चेदेकादशीविद्धा द्वादशी परतः स्थिता।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति नारदवचनात्। एवं शुद्धाभेदाः व्यवस्थापिताः। विद्धाधिकायामप्येकादशीमात्राधिक्ये तु प्रचेताः॥ एकादशीविद्ध
द्धा चे शुक्ले कृष्णे विशेषतः। उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति। न चैतत्स्कांदवाक्यं शुद्धाधिक्ये चरितार्थमिति शंकनीयं। बाधकाभावेन विद्धाधिक्ये
एकादशी द्वादशी चेत्युभयं वर्धते यदि॥८२॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनं। एकादशीमात्रवृद्धौ गृहीयत्योर्व्यवस्थितिः॥८३॥
उपोष्या गृहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः। द्वादशीमात्रवृद्धौ तु शुद्धा विद्धा व्यवस्थिते॥८४॥ शुद्धा पूर्वोत्तरा विद्धा स्मार्तैरीदृशाः॥
पितृवचनप्रवृत्तेर्निवारयितुमशक्यत्वात्। द्वादश्याधिक्ये परेद्युरुपवासः। तदाह व्यासः। एकादशी यदा लुप्ता परतो द्वादशी भवेत्। उपोष्या द्वादशी
तत्र यदीच्छेत्परमं पदमिति। उभयाधिक्येपि परेद्युरुपवासः। एकादशीं दशायुक्तां वर्द्धमाने विवर्जयेत्। क्षयमार्गस्थिते रुद्रे कुर्वीत दशमीयुतामिति।
उभयानाधिक्ये तु नास्ति संदेहः॥ तदेवं स्मार्तनिर्णयसंग्रहः। एकादशीद्वादश्योरुभयोर्वृद्धौ परेद्युरुपवासः। द्वयोरप्यवृद्धौ पूर्वेद्युः। एकादशीमा
त्रवृद्धौ गृहीयत्योर्व्यवस्था। द्वादशीमात्रवृद्धौ शुद्धा पूर्वा। विद्धा तु परेति। अत्राधिकारी निरूप्यते। तत्र कूर्मपुराणे। एकादश्यां न भुंजीत प
क्षयोरुभयोरपि। वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृहीति। तेन गृहस्थस्य शुक्लैकादश्यामेव नित्योपवासः। नैमित्तिककाम्यौ तु कृष्णा
यामपि कार्यौ। तत्र नैमित्तिकाः स्मृत्यंतरे। शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति। का
म्यस्तु मात्स्ये। एकादश्यां तु कृष्णायामुपोष्य विधिवन्नरः। पुत्रानायुः समृद्धिं च सायुज्यं च स गच्छतीति। तथा दिनक्षयेपि पुत्रवतो गृहस्थो १६
पवासनिषेधः। तथा स्मृतिः। एकादश्यां दिनक्षये उपवासं करोति यः। तस्य पुत्रा विनश्यंति मघायां पिंडदो यथा इति। अतश्चैतत्केचिद्रक्षणी

चपिता

आदौ दशमीत्रिकालापरतोच भावाच्च संपूर्णेति यावत्

यं। उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत्। न दुष्यत्युपवासेन उपवासफलं लभेदिति वायुपुराणात्। तत्र तत्रैवोक्तं। नक्तं हविष्यान्नमनोद (नौ)
नं वा फलं तिलाः क्षीरमथांबु वाज्यं। यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति। तथा मार्कंडेये। नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा। नि चा
ष्फलं तु भवेत्तस्या यत्करोति व्रतादिकमिति। तथा मनुः। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनं। उपवासेन दुष्यंति दंतधावनमंजनमिति। मुख्योपवासा
सामर्थ्ये सर्वेषामनुकल्पो मार्कंडेयपुराणे। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन न न निर्द्वादशिको भवेदिति। दानं चोक्तं स्मृत्यंतरे। उपवासा
समर्थश्चेदेकं विप्रं तु भोजयेत्। तावद्धनानि वा दद्याद्यद्भक्त्या द्विगुणं भवेदिति। सर्वथैवाशक्तौ विष्णुरहस्ये। असामर्थ्ये शरीरस्य व्रते च समुप
स्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितमिति। अथ प्रसंगाद्व्रते निषिद्धानि कथ्यंते। अंगिराः। सायमाद्यंतयोरह्नोः सायंप्रातश्च मध्यमे। उप
वासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयमिति। बृहस्पतिः। दिवानिद्रां परान्नं च पुनर्भोजनमैथुने। क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेदिति। कू
र्मपुराणेपि। कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान्। शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियमिति। तथा। असकृज्जलपानं च दिवास्वा
पं च मैथुनं। तांबूलचर्वणं मांसं वर्जयेद्व्रतवासरे इति। वसिष्ठः। उपवासे तथा श्राद्धे न खादेद्दंतधावनं। दंतानां काष्ठसंयोगो हंति सप्त कुलानि चेति। उपवा नि
सदिने श्राद्धप्राप्तौ कात्यायनः। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति। श्राद्धं कृत्वा तु यो विप्रो
न भुंक्ते पितृसेवितं। हविर्देवा न गृह्णंति कव्यं च पितरस्तथेति लिंगवचनाद्भोजने प्राप्ते तदनुकल्पतया आघ्राणं विधीयते। तच्चायं व्रतानुष्ठान
क्रमः। दशम्यामेकभक्तं कृत्वा दंतधावनं कुर्यात्। दशम्यामेकभुक्तं स्यादेकादश्यां न दंतधावनमिति स्मरणात्। ततो दशमीरात्रौ नियमग्रहणं। प्रा
से हरिदिने सम्यक् विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्याद्दृढमेवं व्रतमिति ब्रह्मवैवर्तात्। नियमास्तु नारदीये। अक्षारलवणाः सर्वे हवि
ष्यान्ननिषेविणः। अवनीतल्पशयनाः प्रियासंगविवर्जिता इति। हविष्याणि च। हैमंतिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः। कलायकंगुनीवा
रा वास्तूकं हिलमोचिकाः। षष्टिकाः कालशाकं च मूलं केमुकेतरत्। लवणे सैंधवसामुद्रे गव्ये च दधिसर्पिषी। पयोनुद्धृतसारं च पनसा
म्रहरीतकी। तिंतिणी जीरकं चैव नागरंगकपिप्पली। कदली लवली धात्री फलान्यगुडमैक्षवं। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृत्तावुक्तानि॰ स्मृत्यंतरेपि॰ हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः। माषकोद्रवगौरादीन् सर्वालाभे विवर्जयेत् इति॰ अग्निपुराणे॰ व्रीहिषाष्टिकमुद्गश्यक
लायाः सलिलं पयः। श्यामाका यवनीवाराणेधूमाद्या व्रते हिताः। कूष्मांडालाबुवार्ताक पालंक्यं ज्योत्स्निकास्त्यजेत्॰ मधुमांसे विहायान्यत् व्रते चाहितमी
रितमिति॰ हेमंतेभवं हैमंतिकं। सितं श्वेतं॰ नतु कृष्णपीतादिवर्णं॰ हिलमोचिका शाकविशेषः। कालशाकं॰ पूर्वदिशि प्रसिद्धं॰ केमुकं कंदविशेषः त
१७ द्धातिरिक्तं वा॰ नागरं शुंठी॰ एवं नीह कोरेवडीति प्रसिद्धा॰ अपो स्त्रिका कोशातकी॰ गौरो गौरसर्षपः। नत्वेकादश्यां प्रातः संकल्पं कुर्यात्॰ तथा च वारा
हपुराणे॰ गृहीत्वोदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा ध्यायेद्बुधारयेदिति॰ औदुंबरं ताम्रपात्रं॰ गृह्णीयात् संकल्पयेत्॰ तत्र मंत्रमा
ह विष्णुः। एकादश्यां निराहारस्थित्वाहमपरेहनि॰ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत॥ इत्युच्चार्य ततो विद्वान् पुष्पांजलिमथार्पयेदिति॰ तत
स्तत्पात्रगतं जलं पिबेत्॰ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं॰ उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलमिति॰ विद्धैकादश्युपवासे एवं यो
संकल्पः। विद्धोपवासे सकलं दिनं त्यक्त्वा समाहितः। रात्रौ संपूजयेद्विष्णुं संकल्पं च तदा चरेत् इति नारदीयात्॰ अर्द्धरात्रानंतरं दशमीयुक्ता
चैकादशी तदा मध्याह्नोपरि संकल्पः। दशम्याः शेषदूषेण अर्धरात्रात्परेण तु॰ वर्जयेच्चतुरो यामान् संकल्पार्चनयोस्तदेति वचनात्॰ द्वादशी
कर्तव्यमाह॰ कात्यायनः। प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्॰ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॰ प्रसीद सुमुखो नाथ ज्ञान
दृष्टिप्रदो भव॰ इमं जपित्वा हरये निवेद्योपोषणं व्रती॰ द्वादश्यां पारणं कुर्याद्वर्जयित्वा लघु पोदकीमिति॰ सूतकादौ दानार्चनरहितं उपवासमात्रं
कुर्यात्॰ तदुक्तं कूर्मपुराणे॰ काम्योपवासे संप्राप्ते त्वंतरा मृतसूतके॰ तत्र काम्यव्रतं कुर्यादानार्चनविवर्जितमिति॰ वाराहपुराणे॰ १७
सूतके च नरः स्नात्वा प्रणम्य मनसा हरिं। एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते॰ मृतकेपि न भुंजीत एकादश्यां सदा नरः॥ द्वादश्यां तु
समश्नीयात् स्नात्वा विष्णुं प्रणम्य चेति॰ तत्र परित्यक्तं देवार्चनं सूतकांते कुर्यात्॰ तदुक्तं मत्स्यपुराणे॰ सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं॰ दानं दत्वा
विधानेन व्रतस्य फलमश्नुते इति॰ स्त्रीणां रजोदर्शनेपि न व्रतस्य त्यागः। किंतु देवार्चनादिरहितं सूतकादावेवोपास्य स्त्रीमात्रं कार्यम्॰ तदा

न कुर्यात्॰ न तूपवासमित्यर्थः। उपवासकरणे तदंगहरिपूजायाः प्राप्तत्वादेव तद्विधिवैयर्थ्यात्॰ यस्तु तादृशः प्रागेवोपवासद्वयासमर्थः। सकाम्यं
मिसस्यबाधकमिति न्यायेन श्रवणद्वादश्यामेवोपवासं कुर्यात्॰ तदुक्तं नारदीये॰ उपोष्य द्वादशीं पुण्यां विष्णुनक्षत्रेण संयुतां॰ एकादश्युद्भ
वं पुण्यं नरः प्राप्नोत्यसंशयं॰ वाजपेयपथा यज्ञे कर्महीनोपि दीक्षितः। सर्वं फलमवाप्नोति अस्नातोप्यहुतोपि सन्निति॰ तथा तत्रैवोपसंहारग्रंथे॰
एवमेकादशीं भुक्त्वा द्वादश्यां समुपोषणात्॰ पूर्ववासरजं पुण्यं सर्वमाप्नोत्यसंशयमित्युक्तं॰ पारणं त्वेतद्व्रतसंबंधिपारणादिने उभयानुवृत्तौ
उभयांते इति मुख्यः पक्षः। अन्यतरांत इति गौणः। इयं च श्रवणद्वादशी बुधवासरयुक्तातिप्रशस्ता॰ श्रवणेन द्वादशीयोगे बुधवारो यदा भवेत्॰
शुक्ला त्रयोदशी पूर्वापरा कृष्णा त्रयोदशी॰ अलाभे साधु पूर्वैव परानंगत्रयोदशी॰ ८७॰ या शुक्लाग्रहयते पूर्वाग्रह्या तां सापराह्णिकी॰
अत्यंतमहती नामद्वादशी सा प्रकीर्तिता इति विष्णुधर्मोत्तरात्॰ भाद्रे सा स्यात् फलप्रदा॰ मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॰ अत्यंतमहतीत
स्यां दत्तं भवति चाक्षयमिति स्कंदपुराणात्॰ तस्यां संगमस्नानादि कार्यं॰ स्नानं जप्यं तथा होमो दानं श्राद्धं सुरार्चनं॰ सर्वमक्षय्यफलदं तस्यां भृगुकु
लोद्वह॰ तस्मिन्नेव दिने यस्तु स्नातः क्वचन संगमे॰ सगंगास्नानजं राम फलं प्राप्नोत्यसंशयं॰ श्रवणे संगमाः सर्वे परस्युषिफलप्रदास्तथा॰ वि
शेषाद्द्वादशीयुक्ते बुधयुक्ते विशेषतः इति विष्णुधर्मोत्तरात्॥ इति द्वादशीनिर्णयः॥ अथ त्रयोदशीनिर्णयमाह॰ शुक्लेति॰ त्रयोदशीप्र
कर्तव्या द्वादशीसहिता मुने इति ब्रह्मवैवर्तात्॰ इदं च शुक्लत्रयोदशीविषयमेव॰ षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॰ एताः परयु
ताः पूज्याः पराः पूर्वयुतास्तथेति॰ निगमे कृष्णत्रयोदश्याः परविद्धत्वोक्तेः॥ ८८॥ अलाभे त्विति॰ द्वितीयदिने त्रिमुहूर्तालाभे सापि कृष्णापि॰ अनंगत्रयोद
शी मार्गशीर्षशुक्लत्रयोदशी पूर्वा॰ अनंगत्रयोदशी रंभा उपोष्याः पूर्वसंयुताः इति विशेषापि संवर्तोक्तेः॥ ८९॥ या शुक्लेति॰ त्रयोदशी प्रकर्त
व्यापाभवे दापराह्णिकीति स्कांदादित्यर्थः॥ इति त्रयोदशीनिर्णयः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ चतुर्दशीनिर्णयमाह॰ चतुर्दश्युत्तरेति॰ चतुर्दश्याच पूर्णिमेति युग्मवचनात्॰ कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी॰ पूर्वविद्धातु कर्त
व्या परविद्धा न कर्हिचिदिति आपस्तंबवचनाच्चेत्यर्थः॥८८॥ उदयइति॰ भाद्रपद शुक्लचतुर्दश्यामनंतव्रतं॰ तच मध्याह्नव्यापिनी ग्राह्या॰ मध्या
ह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे॰ ददर्श शीला सा स्त्रीणां समूहं रक्तवाससां। चतुर्दश्यामर्चयंतं भक्त्या देवं पृथक् पृथक् इति इतिहास
दर्शनादिति केचित्॰ तन्निरासार्थमिदमुच्यते॰ दैवे तु उदयिकी ग्राह्येति वचनेन युग्मशास्त्र[struck] द्विमुहूर्तोदयव्यापिनी[struck] त्रिमुहूर्त्तव्यापि
द्विमुहूर्त्तव्याप्याग्रहणमुचितं॰ इतिहासे तु मध्याह्नस्य विधानाभावात्तत्कल्पनस्य प्रत्यक्षवचनविरोधेऽनुचितत्वादिति भावः॥ अपवादमा
१८ चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्णा चतुर्दशी॥८८॥ उदये द्विमुहूर्त्तापि ग्राह्यानंतव्रते तिथिः॥ शुक्लापि रात्रियुक्तास्या
चैव श्रवणमासयोः॥८९॥ शुक्ला सर्वापि पूर्वैव यदि स्याद परा ह्णकी॥ प्रदोषे वा निशीथे वा द्वयोर्वा यास्ति सा भवेत्॰ ९०॥
शिवरात्रिव्रते तत्र द्वयोस्स्तत्प्रशस्यते॥ तदभावे निशीथैकव्याप्तापि परिगृह्यतां॥९१॥ अस्याश्चासंभवे ग्राह्या प्रदो
षव्यापिनी तिथिः॥ तिथ्यंते पारणं यामचतुष्पादर्वाक् समापने॥९२॥ अन्यथा पारणं प्रातरन्यतिथ्युपवासवत्॰ पूर्ववि
द्धैव सावित्रीव्रते पंचदशी तिथिः॥९३॥ नाड्योष्टादशभूतस्य स्युश्चेत्तत्र परेहनि॰ व्रतांतराणि सर्वाणि परेह्न्येव सर्वदा॰ ९४॥ १९
ह॰ शुक्लापीति॰ मधोः श्रावणमासस्य शुक्लायाच चतुर्दशी॰ सारात्रिव्यापिनी ग्राह्या परा पूर्वा ह्णगामिनीति बौधायनोक्तेः॥ परामासांतव
र्तिनी शुक्लचतुर्दशीत्यर्थः॥८९॥ क्वचिदपवादमाह॰ शुक्लेति॰ पूर्वदिनेऽपराह्णव्यापित्वे शुक्लचतुर्दश्यपि पूर्वैवेत्यर्थः॥ तदुक्तं स्कंदे॰ चतुर्द
शी च कर्तव्या त्रयोदश्यायुता विभो। मम भक्तैर्महाबाहो भवेद्या चापराह्णकी॰ दर्शविद्धा न कर्तव्या राकाविद्धा कदाचनेति॰ अत्र मम भक्तै
रिति लिंगाच्छिवचतुर्दशीविषयत्वं द्रष्टव्यं॰ अथ शिवरात्रिनिर्णयमाह॰ प्रदोषे वेति॰ त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु॰ भूतविद्धातु

मीविद्धमेतामेका

ह पुत्रस्य॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति॰ स्त्रष्यंगोप्याह॰ संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमिति॰ सत्यव्रतोपि॰ प्रारब्धदीर्घ
तपसां नारीणां यद्रजो भवेत्॰ न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति॰ शुध्यनंतरं देवार्चनादिकं कुर्यात्॰ तथा च स्मृतिः॥ स्नात्वा भर्तुश्चतुर्थे
ह्नि शुद्धा स्यात्परिचारणे॰ पंचमेहनि शुद्धा स्याद्दैवे पित्र्ये च कर्मणि॰ नित्योपवासप्रकारो विष्णुरहस्ये भितः हि॥ अथ नित्योपवासी चेत्सायंप्र
प्रातर्भुजिक्रियां॰ वर्जयेन्मतिमान्विप्रः संप्राप्ते हरिवासरे इति॰ अत्रैव वैष्णवेपि॰ इति विज्ञाय कुर्वीत चतुर्थमेकादशीव्रतं॰ विशेषनियमाशक्तो अहो
रात्रं भुक्तिविवर्जितः॥ निगृहीतेंद्रियः श्रद्धासहायो विष्णुतत्परः॥ उपोष्य द्वादशीं पापान्मुच्यते नात्र संशयइति॰ यदा द्वादश्यां श्रवणनक्षत्रं तदा शुद्धैका
श्रवणेन युता चेत्स्याद्द्वादशी सा हि वैष्णवी॥ स्मार्त्तैः श्रीपोषणीयास्यात्त्यजेदेकादशीं तदा॰ उपवासव्रतादन्यव्रते सार्ध[illegible]मुहूर्तकैः॥८५॥ सप्तभिर्दशदशीं त्यजेत्॰
दशीमपि परित्यज्य द्वादश्यामेवोपवसेत्॰ इत्याह॥ श्रवणेनेति॰ तथा च नारदीये॰ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता॰ तयोरेवोपवासश्च त्रयोदश्यां च
पारणमिति॰ तयोः शुक्लकृष्णद्वादश्योः॥ एतच्चोपवासद्वयासमर्थप्रति॰ समर्थस्तूपवासद्वयं कुर्यात्॰ तदा च जलप्राशनेन पारणं॰ अपो श्नातितन्नैवाशि
तं नैवानाशितं इति श्रुत्या जलप्राशनस्याशिताशितोभयरूपत्वोक्तेः॥ यदा च पारणादिने कलामात्रं दंडमात्रं दंडद्वयं वा तदा तन्मध्य एव पारणा
कार्या॰ तदुक्तं॰ नारदीये॰ अल्पायामथ यामिन्यां द्वादश्यामरुणोदये॰ स्नानार्चनक्रियाः कार्याः दानहोमादिसंयुता॰ महाहानिकरी ह्येषा द्वादशी
लंघिता नरैः॥ करोति धर्महरणमस्नातेव सरस्वतीति॥ स्कांदेपि॰ यदा भवेदतीवाल्पा द्वादशी पारणादिने॰ उषःकाले द्वयं कुर्यात्प्रातर्मध्या
ह्निकं तदेति॰॥८५॥ उपवासेति॰ तथा च द्वादशीकल्पे॰ पूर्णा विद्धां दिनार्द्धेन नंदां पूर्णामपि त्यजेत्॰ यदीच्छेदात्मसंतानं नियमेषु चतुर्ष्वपि॰
नोपोषितं च नक्तं च नैकभक्तमयाचितं॰ नंदायां पूर्णविद्धायां कुर्याद्दैश्वर्यमोहितइति॰ दिनार्द्धेन सार्धसप्तमुहूर्तकैरित्यर्थः॥ अत्र त्वादि
कपंचदशभिस्तथेति प्रागुदाहृतं॰ इतोन्यूनवेधे तु तिथ्यंतरवन्मध्याह्नादिव्याप्त्या निर्णय इति संक्षेपः॥ इत्येकादशीनिर्णयः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ द्वादशीनिर्णयमाह॰ द्वादशीपूर्वविद्धैवेति॰ रुद्रेण द्वादशीयुक्ता इति युग्मवाक्यादित्यर्थः॥ अथ श्रवणद्वादशीनिर्णयः॰ अत्र द्वादश्याः अल्पश्रवण
योगेपि श्रवणद्वादशीप्रयुक्तं उपवासादि भवति॰ द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः। न तु सा तेन संयुक्ता तावत्येव प्रशस्यत इति॰
९८ तत्र च विद्धाधिकायाः दिनद्वयेपि श्रवणयोगे एकादशीयुता ग्राह्या॰ द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा॰ स एव वैष्णवो योगो विष्णुशृं
खलसंज्ञकः। उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति मात्स्यात्॰ तत्रैव च तदा एकादशीद्वादशीप्रयु
क्तमुपवासद्वयं। तत्रैव यदा श्रवणमेकादशीं स्पृष्ट्वा द्वादशीं स्पृशति तदातिप्रशस्तमुक्तं नारदीये॰ संस्पृश्यैकादशीं राजन् द्वादशीं यदि संस्पृ
[illegible] ॥ द्वादशीपूर्वविद्धैव व्रतेषु निखिलेष्वपि॰ ॥ ८६ ॥
शेत्॰ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहतीति॰ यदा शुद्धाधिकायाः दिनद्वयेपि श्रवणयोगः स चोत्तरदिन एवोदयकालीनः तदोत्तरा ग्रा
ह्या॰ तथा च बृहन्नारदीये॰ उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते इति॰ यदा तु द्वादश्याः श्रवणयोग एव नास्ति किंत्वेकादश्या एव तदा तस्यै
मपि श्रवणद्वादशीदेप्रयुक्तं व्रतं कर्तव्यं॰ तदुक्तं नारदीये॰ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॰ एकादशी तदोपोष्या पापघ्नी श्रवणान्वि
तेति॰ विद्धाधिकायाः अप्युत्तरदिने श्रवणयोगाभावे श्रवणयोगवतीं ग्राह्या विद्धापि ॥ दशम्येकादशी यत्र सा नोपोष्या भयेतिथिः। श्रवणेन तु
संयुक्ता सा शुभा सर्वकामदेति॰ अग्निपुराणात्॰ तदाप्येकादश्युपवासस्य तेन सह तंत्रमेव॰ यदा त्वेकादशीद्वादश्युपवासौ दिनभेदेन प्राप्नुतः
तत्र शक्तेन द्वयमपि कर्तव्यं॰ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्॰ न तत्र विधिलोपः स्यादुभयोर्देवता हरिरिति भविष्योत्तरात्॰ यस्तु
द्वादश्यंतरे उपवासाशक्तः चेद्वर्षव्यापि श्रवणद्वादशीव्रतप्रयोग उपवासद्वयासमर्थो भिन्न पाश्चकृतैकादशीव्रतसंकल्पः पश्चात्तत्रास ९८
मर्थः स संकल्पितमेकादश्युपवासं विधाय श्रवणद्वादश्यां तत्प्रयुक्तं विष्णुपूजादि विधाय भुंजीत॰ संकल्पबाधप्रसंगात् शेषविरो
धप्रसंगाच्च॰ तदुक्तं मात्स्यपुराणे॰ द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि॰ उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिमिति॰ हरिपूजामे

पातश्च शिवरात्रिव्रतं चरेत् इति॰ वायुपुराणात्॰ प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी॰ रात्रौ जागरणं तस्मात्तस्मात्तां समुपोषयेदिति सम
रणाच्च॰ निशीथवेधो नारदीये॰ अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी॰ शिवरात्रिव्रतं तत्र सोश्वमेधफलं लभेदिति नारदीयात्॰ तथा माघ
कृष्णचतुर्दश्यामादिदेवो महानिशि॰ शिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिरिति ईशानसंहितो
क्तेश्च॰ एवं सत्येकस्मिन्नेव दिने प्रदोषनिशीथोभयव्यापिनी तत्र व्रतं कार्यं॰ दिनद्वयेप्युभयव्याप्तिस्तत्रैव श्वासंभवी॰ यदा पूर्वेद्युर्नि ८
श्र शीथव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तत्र योदशीयोगस्य प्रशस्तत्वात्पूर्वैव॰ तदुक्तं स्कांदे॰ जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च॰ पूर्वविद्धैव कर्त
व्या तिथिभांते च पारणमिति॰ तथा पद्मपुराणेपि॰ अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्॰ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति॰
यदा पूर्वेद्युर्निशीथयोगात्पूर्वं दूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः स्यर्वंशान्निशीथपर्यंतं गेव समाप्ता पूर्वेद्युः प्रदोषनिशीथव्याप्त्योरुभयोरप्यसं
भवात् परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च परविद्धैव ग्राह्या॰ एतत्तदाभिप्रेत्य स्मर्यते॰ माघासिते भूतदिनं कदाचिदुपैति योगं यदि पंचदश्याः।
जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति॰ यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः सपवशात्प्रदोषात्पूर्वमे
व समाप्ता तदा पूर्वेद्युरेव निशीथव्यापित्वात् ग्राह्या॰ एवं च दिनद्वयेपि निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका॰ दिनद्वये
पि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका॰ एकैकस्मिन् दिने एकैकव्याप्तौ जयायोगो नियामक इति॰ ॥ ९४ ॥ पारणनिर्णयमा
ह॥ तिथ्यंत इति॰ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी॰ एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति स्कंदवचनात्॰ उपोषणं
चतुर्दश्यां चतुर्दश्यां च पारणं॰ कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वेति अस्य चैवं व्यवस्था इत्यर्थः॥ पंचदशीनिर्णयमाह॥ ९५॥
पूर्वविद्धैवेति॰ भूतेति विद्वान् कर्तव्या अमावास्या च पूर्णिमा॰ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्॰ यदा चाष्टादशदंडाश्च
तुर्दशी तदा सावित्रीव्रतेपि परैवेत्याह॰ नाड्य इति॰ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति वचनादिति भावः। व्रतांतराणि तु परविद्धापि ग्राह्येत्याह॰ व्रतांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा श्राद्धदर्शनिर्णयमाह॰ श्राद्धइति॰ अपराह्णः पितृणामित्यर्थः॥ दिनद्वयेपीति॰ अपराह्णैकदेशेदिनद्वयेपिचेत्तौ अधिकैकदेशव्यापिनीग्राह्येत्यर्थः॥ ६५॥ एकदे
शसमव्याप्तावाह॰ तुल्यत्वं चेति॰ खर्वादिवचनादित्यर्थः॥ कृत्स्नेति॰ दिनद्वयेपिसकलापराह्णव्याप्तौतिथिवृद्धिवशादुत्तरेत्यर्थः॥ ६६॥ साग्नीति॰ उभयत्रापि
राह्णस्पर्शाभावेसाग्निकानग्निकव्यवस्थाभवेत्॰ तामेवदर्शयति॰ पूर्वेद्युरिति॰ तदाहजाबालिः॥ अपराह्णद्वयाव्यापीयदिदर्शस्तिथिक्षये। आहिताग्नेः
सिनीवालीनिरग्न्यादेःकुहूर्मतेति॥ सिनीवालीदृष्टचंद्रापूर्वैव॰ कुहूर्नष्टचंद्राउत्तरेत्यर्थः॥ निरग्न्यादेरित्यादिपदात्स्त्रीशूद्रयोरपिग्रहणं॰ तथाचलौगा

श्राद्धेपराह्णकालीनोदर्शश्चा दैववन्मतः। दिनद्वयेप्येकदेशेचेत्तौग्राह्योमहत्तमः॥ ६७॥ तुल्यत्वंचैकदेशेचेत्क्षयेपूर्वान्यथोत्तरा॰

२० कृत्स्नव्याप्तौद्वयोरह्नोरुत्तरास्तिथिवृद्धितः॥ ६६॥ साग्न्यनग्निव्यवस्थास्यान्नस्याच्चेदपराह्णयोः॥ पूर्वेद्युःसाग्निकाःकुर्यु

रुत्तरेद्युरनग्निकाः॥ ६७॥ पर्वप्रतिपदोःसंधिर्मध्याह्नेवाततःपुरा॰ अन्वाधानंपूर्वदिनेयागःसंधिदिनेभवेत्॰ ६८॥ ऊर्ध्वंमध्या

ह्नतःसंधावन्वाधानंहितद्दिने॰ इष्टिंपरदिनेकुर्यादन्योवाजसनेयिनः॥ ६९॥ …क्तिः॥ सिनीवालीद्विजैःकार्यासाग्निकैःपितृकर्म

णि॰ स्त्रीभिःशूद्रैःकुहूःकार्यातथाचानग्निकैर्द्विजैरिति पंचदशीनिर्णयः॥ ७० अथेष्टिपर्वनिर्णयमाह॰ पर्वेति॰ अन्वाधानमग्निपरिग्रहरूपो
यागारंभः पूर्वेद्युरग्नीन्गृह्णातिउत्तरमहर्यजतीतिशतपथश्रुतेः॥ यद्यपिसंधौयजेतेतिश्रुत्यासंधिकालएवयागकालःप्रतीयतेतथापिसंधि
मभितोयजेतेतिश्रुतेःसंधिपूर्वापरकालेयागप्रयोगः॥ अतएवबौधायनः॥ सूक्ष्मत्वात्संधिकालस्यसंधौविषयउच्यते॰ सामीप्यंविषय
यंप्राहुःपूर्वेणाह्नापरेणचेति॰ एवंचचीर्णेशानोपवस्तस्ययागस्यचतुरोंशिदुः॥ द्वावंशावुत्सृजेदंत्यौयागेचव्रतकर्मणीतिलौगाक्षिवचनात्पर्वणो
शत्रयमौपवस्तस्यान्वाधानस्यकालः॥ यागस्यचचतुरोंशापर्वचतुर्थांशमारभ्यप्रतिपदंशत्रयंकालः॥ अन्वाधानेपर्वचतुर्थांशोवर्ज्यः॥ यागे २०
चप्रतिपच्चतुर्थांशोवर्ज्यः॥ यदापर्वप्रतिपदोःसंपूर्णेतदानेवसंदेहः॥ खंडत्वेतुलौगाक्षिः॥ पूर्वाह्णेवाथमध्याह्नेयदिपर्वसमाप्यते॰ उपोष्यतत्रपू
र्वेद्युस्तदहर्यागइष्यते॰ अपराह्णेथवारात्रौयदिपर्वसमाप्यते॰ उपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यतइति॰ उपोष्यान्वाधायेत्यर्थः॥ अत्रमध्याह्ना

दिशब्दायौगिकाः॥ नतुपंचधाविभागाश्रयणेनपारिभाषिकाः॥ तेनाह्नोमध्योमध्याह्नइतियोगेनावर्तनंमध्याह्नशब्दार्थः॥ तत्पूर्वोत्तरभागौपूर्वाह्णापराह्णौ
शब्दार्थौज्ञेयौ॰ ॥ ६८॥ अयंचनिर्णयोमध्यंदिनीयभिन्नानामित्याह॰ अन्यइति॰ वाजसनेयीभिन्नइत्यर्थः॥ ६८॥ वाजसनेयिनंप्रत्याह॰ यस्त्विति॰
अतएवतद्भाष्यार्थसंग्रहकारः॥ मध्यंदिनात्स्यादहनीहयस्मिन्प्राक्पर्वणःसंधिरियंतृतीया। साखर्विकावाजसनेयिमत्यातस्यामुपोष्याथपरेद्युरिष्टिरिति॰
आवर्तनादूर्ध्वमस्तमयादर्वाक्यदासंधिर्भवतितदाअहःसंधिमतीतिथिःप्रथमाखर्विका॰ एषैवसंधिश्चेत्सातिथिर्द्वितीया॰ उभेअपेक्ष्यपूर्वाह्णसंधि
मतीपर्वतिथिस्तृतीयाखर्विकाभवति॰ तस्यांतृतीयातिथौपर्वकालस्याल्पत्वात्साखर्विकेत्युच्यते॰ शाखांतरव्यापिनामीदृशेविषयेपूर्वेद्युरन्वाधाना

यस्तुवाजसनेयीस्यात्तस्यसंधिदिनात्पुरा॰ नक्वाप्यन्वाहितिः॥ किंतुसदासंधिदिनेहिसा॥ १००॥ संधिश्चेत्संगवादूर्ध्वंप्राक्चेदाव

र्तनाद्रवेः॥ सापौर्णमासीविज्ञेयासद्यस्कालविधौतिथिः॥ १०१॥ वृद्धिःप्रतिपदोयास्तितदर्द्धंपर्वणिक्षिपेत्॰ क्षयस्यार्द्धंतथाक्षिप्त्वासं

धिर्निर्णीयतांसदा॥ १०२॥ दिर्कसंधितिथावेष्टिः॥ एवंसतिवाजसनेयिनांनक्वापिसंधिदिनात्पूर्वेद्युरन्वाधानादिकमस्ति॰ सोयंविशेषः॥ आवर्तने

नतःपुरावायदासंधिर्भवतितदावाजसनेयिव्यतिरिक्तानांपर्वचतुर्थांशेइष्टिःप्राप्नोति॰ तत्रविशेषमाहगार्ग्यः॥ प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते॰ पुनःप्रणी
यकृत्स्नेष्टिःकर्तव्यायागवित्तमैरिति॰ नन्वपराह्णसंधौप्रतिपच्चतुर्थांशस्ययागकालत्वंप्राप्नोतितत्प्रतिषिद्धं॰ नयष्टव्यंचतुर्थांशेयागेःप्रतिपदःक्वचिदितिस्मृतेः॥
अतस्तादृशेविषयेयागएवलुप्येतेतिचेन्नैवं॰ वृद्धशातातपेनप्रतिप्रसवाभिधानात्॰ संधिर्यद्यपराह्णस्याद्यागंप्रातःपरेहनि॰ कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्य
तीति॰ एवंतर्हिप्रतिषेधोनिर्विषयस्यादितिचेन्नैवं॰ सद्यस्कालविशेषेयेचरितार्थत्वात्॰ तदाहकात्यायनः॥ संधिश्चेत्संगवादूर्ध्वंप्राक्पर्यावर्तनाद्रवेः॥ सापौर्णमासी
सा॰हम विज्ञेयासद्यस्कालविधौतिथिरिति॰ अनेनसंधिदिनात्पूर्वेद्युरन्वाधानंसंधिदिनेउत्कृष्यते॰ तदेतदाह॰ संधिश्चेदित्यादि॰ संधिनिर्णयश्चयथास्थितरीत्या।
किंतन्यथेत्याह॰ वृद्धीति॰ तिथेःपरस्याघटिकास्तुयास्युर्न्यूनास्तथैवाप्यधिकाश्चतासां॰ अर्द्धंवियोज्यंचतथाप्रयोज्यंह्रासेचवृद्धौप्रथमेदिनेतदितिवचना
१०२ दित्यर्थः॥ अमावास्यायांविशेषमाहशातातपः॥ द्वितीयांशेमुहूर्तांश्चेत्प्रतिपद्यपराह्णकी॰ अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनादिति॰ सोयंविशेषोनाश्वलाय

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र च बौधायनः॥ द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णकी॰ अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्॰ चतुर्दशी चतुर्यामा अमावास्या न दृश्यते॰ श्वो
भूते प्रतिपद्येत्स्यात्पूर्वांतिं चैव कारयेत्॰ चतुर्दशी तु संपूर्णा द्वितीया क्षयगामिनी॰ चरुरिष्टिरमायां स्यात्पूर्ते वन्यादिकी क्रियेति॰ एतेषां वचनानामय
मर्थः॥ अह्नि चतुर्दशी संपूर्णा अस्तमयपादर्वागमावास्या संपूर्णा व्याप्या॰ ततश्चापराह्णव्याप्त्यभावात् श्राद्धाद्यान्वाधानाय चापूर्वोक्तरीत्या पद्यपि नि
२२ मित्तभावेन भवेतै तथापि प्रतिपद्द्वितीयायां सत्यां चंद्रस्य दृश्यमानत्वात् तद्दर्शने चेष्टेर्निषिद्धत्वात् प्रतिपद्युतायाममावास्यायामिष्टिः॥ स्वल्पामा
वास्योपेतायां चतुर्दश्यां श्राद्धान्वाधानादिकं कर्तव्यमिति॰ तथा च बौधायनेनोक्तं॰ यदा चतुर्दशीयामं तुरीयमनुपूरयेत्॰ अमावास्या क्षीयमा

बौधायनमते दर्शश्राद्धं चेष्टिर्विशिष्यते॰ द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णकी॥ १०३॥ अन्वाधानं चतुर्दश्यां दर्शस्वल्पे
पि वर्जयेत्॰ दर्शश्राद्धं तदा कार्यमिति बौधायनोदितं॥ १०४॥ इत्यादिविकृतीः सर्वाः पर्वण्येवेति निर्णयः॥

णात्तदैव श्राद्धमिष्यते इति॰ चंद्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह॰ कात्यायनः॥ यजनीये ह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते॰ तत्र व्याहृतिभि
र्हुत्वा दंडं दद्याद्द्विजातये इति॰ स्मृत्यंतरेपि॰ अर्वागस्तमयाद्यत्र द्वितीया तु प्रदृश्यते॰ तत्र यागं न कुर्वीत विच्छेदेवाः पराङ्मुखा इति॰ यत्तु यदहः
प श्चाच्चंद्रमा अभ्युदेतीति तदहर्यजान्नेमाक्षुत्कामभ्युदेतीति श्रुतिवचनं चंद्रदर्शनदिनेपि यागकर्तव्यताबोधकं तत् बौधायनातिरिक्तविषयं॰ इति प्रकृति
निर्णयः॥ अथ विकृतिकालो निरूप्यते॰ इष्ट्यादीति॰ आदिना पशुयागसंभवः॥ पर्वण्येवेति॰ पशुरिष्ट्या पशुना सोमेन वा यजते सोमावास्यायां पौर्णमास्यां वा
यजेतेति वचनेन न च ग्रहकालवत्तस्य प्राधान्यादित्यर्थः॥ तत्राविशेषः॥ कात्यायनेनोक्तः॥ आवर्तनात्प्राक् यदि पर्वसंधिः कृतापि तस्मिन् न प्रकृतिं विकृ
त्याः॥ तत्रैव यागः परतो यदि स्यात् तस्मिन्न्वे कृत्याः प्रकृतेः परेद्युरिति॰ आवर्तनं ततः पूर्वापर्वसंधौ संधिदिने प्रकृतिं कृत्वा पश्चाद्विकृतिः कर्तव्या॰ प २२
श्चावर्तनात्परतः संधिस्तदा केवलं विकृतियागः संधिदिने कर्तव्यः॥ प्रकृतियागस्तु संधिदिनात्परेद्युरनुष्ठेय इत्यर्थः॥ आवर्तने ततः पूर्वकाले ततः परकाले वा
संधिरित्येतेषु संधिदिने एव विकृतेरनुष्ठानं प्रकृतेस्तु पूर्वोक्तरीत्या संधिदिने परेद्युर्वा अनुष्ठानं व्यवतिष्ठत इति विकृतिकालनिर्णयः॥ चतुर्थप्रकरणं संपूर्णं॥

पंचमप्रकरणार्थमाह॥ पंचमेति॰ तत्र पूर्वार्द्धे नक्षत्रादिनिर्णयः॥ आदिना योगकरणसंग्रहः॥ उत्तरार्द्धे तु कालभेदेन कर्मविशेषनिरूपणमित्यर्थः॥ १०५॥ य
स्मिन्निति॰ नक्षत्रस्य दिनद्वयेपि सत्वे यस्मिन्दिने अस्तमयव्यापित्वं तत्र तन्निमित्तकोपवासः कार्यः॥ अयं मुख्यः पक्षः॥ तदसंभवे तु निशीथव्यापि ग्राह्य
मित्यर्थः॥ उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः॥ पूज्यते यत्र वारामा निशीथे शशिना सहेति विष्णुधर्मोत्तरात्॰ अस्तमयनिशीथोभय
योगे त्वतिप्रशस्त्यं॥ एवं च यदा पूर्वेद्युः केवलनिशीथयोगः॥ परेद्युश्च केवलोस्तमययोगस्तदा परेद्युरेवोपवासः निशीथे शशियोगस्तु ज्योतिः
शास्त्रप्रसिद्धरावबोध्यः॥ न तु लौकिकः॥ दिनद्वयेप्यस्तमययोगाभावे निशीथयोगेन पूर्वेद्युरेवोपवासः॥ १०६॥ उपवास इति॰ उपवासे

पंचमे तु प्रकरणे पूर्वार्द्धे भादिनिर्णयः॥ १०५॥ उत्तरार्द्धे कालभेदात्कर्मभेदोपदेशनं॰ यस्मिन्नस्तमियाद्भानुस्तन्नक्षत्रमुपोषणे॥ १०६॥
मुख्यं तस्यासंभवे तु ग्रहीतव्यं निशीथयुक्॰ उपवासे यदृक्षं स्यात्तद्दिनं तत्कर्मकृत्ययोः॥ १०७॥ उदये त्रिमुहूर्तस्थं नक्षत्रं व्रतदा
नयोः॥ दिनद्वये तथा चेत्तु पूर्वं स्याद्दुर्बलत्वतः॥ १०८॥ श्रवणं तूत्तरं ग्राह्यमुपाकरणकर्मणि॰ पित्र्ये तु तिथिवत्सर्वं नक्ष
त्रस्य विनिर्णयः॥ १०९॥ पूर्वं स्यादुपवासादावुत्तरो व्रतदानयोः॥ योगः श्राद्धे कर्मकालव्याप्तस्तु परिगृह्यतां॥ ११०॥

यादृशे नक्षत्रनिर्णयः तादृश एव नैमित्तकर्मकृत्ययोः॥ न तु प्रदोषमध्याह्नव्याप्त्यामित्यर्थः॥ उपवासे यदृक्षं स्यात्तद्दिनं तत्कर्मकृत्ययोरिति स्कांदात्॥ १०७॥ उदये त्रि
इति॰ तथा च विष्णुधर्मोत्तरे॰ सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति॰ एतच्च परिशेषा
द्व्रतादिविषयं॰ दिनद्वय इति॰ तथात्वे॰ उदयव्यापित्वे॰ बलवत्त्वात्॥ संपूर्णाहोरात्रव्यापित्वात्॰ १०८॥ श्रवणं त्विति॰ यानि षष्ठासहितं कुर्या
च्छ्रावणं कर्म यद्भवेत्॰ तत्कर्म सफलं विद्यादुपाकरणसंज्ञकमिति वचनात्॰ पित्र्ये त्विति॰ अपराह्णव्यापित्वे शत्रादित्यर्थः॥ १०९॥ योगनिर्णयमाह॥
पूर्वः स्यादिति॰ पूर्वेद्युरस्तमयव्यापी योग्राह्यः॥ निशीथमात्रव्याप्तिस्तु नक्षत्रवन्न ग्राह्या॰ प्रमाणाभावात्॰ व्यतीपातपारणस्यैवाह्न्येव शास्त्रेणोक्तत्वा
च्च॰ केवलनिशीथव्याप्तिग्रहणे संभवाद्योगादिति बोध्यं॥ व्रतदानयोरुत्तरो ग्राह्यः॥ श्राद्धे तु पराह्णव्याप्तः॥ ११०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणमिति॰ ववबालवादिकरणं तिथ्यर्द्धमितं तद्दिनद्वयव्यापित्वेनासंदेहाद्यस्मिन्दिने करणसद्भावस्तद्दिन एव तत्कर्म कार्यं॰ यदा तु सायंसंध्यामारभ्य परेद्युरुदयात्प्रा
गेव करणं समाप्येत तत्र कथमिति चेद्भद्राकरणोक्तन्यायेन सर्वकरणेषु निर्णय इति भ्रमः॥ भद्राकरणे चानिर्णयो भविष्योत्तरे॥ भद्रेव्रते च पठ्यते॰ यस्मिन्दिने भवेद्भद्रा तस्मिन्नह
२२ नि भारत॰ उपवासस्य नियमं कुर्यान्नारी नरोपि वा॰ यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वये॰ कार्यं तेनोपवासस्यादिति पौराणिको विधिः॥ प्रहरस्योपरि यदा स्याद्विष्टिः प्रह
रत्रयं॥ उपवासस्तदा कार्य एकभक्तं ततोन्यथेति॰ उदयादारभ्य यावदस्तमयं विष्टिसत्तायां नास्त्युपवासे संदेहः॥ यदा तु प्रहरमात्रं विष्टिर्नास्ति तस्योपरि प्रहरत्रयं विष्टिर्भ
वति तदा कृत्स्नदिनव्याप्तेर्भद्राया अभावेपि एकदेशव्याप्तेः सद्भावादुपवासोनुष्ठेयः॥ अन्यथेत्यनेनैकदेशव्याप्त्यभावोपि विवक्षितः॥ तस्मिन्पक्षे समनंतरातीतवचनाद्दिनद्व

करणं यद्दिने तत्तु ग्राह्यं रात्रौ यदा तदा॥ दिनद्वयैकभक्ताभ्यामुपवासः प्रसिध्यति॥१११॥ वारेषु संशयाभावाद्गृहीतव्यं यथास्थितं॥

येप्येकभक्तं कार्यं॰ यस्तु भद्राव्रतं संकल्प्याहोरात्रमुपोषितुं न शक्नुयात्॰ असौ भद्रायुक्तघटिकासु भोजनं परित्यजेत्॰ भद्रारहितकालेपि भुक्त्वा उपवासान्न हीयते॰॰ न पि
याच भविष्योत्तरे पठ्यते॰ स्नातः संपूज्य तामेव ब्राह्मणं च स्वशक्तितः॥ ततो भुंजीत राजेंद्र यावद्भद्रा न जायते॰ अथवातीतेपि भद्रायाः कामतो वाग्यतः शुचिः॥ न विंचेद्दर्शयेत्रा
त्रोपावद्भद्रा प्रवर्तत इति॰ अहश्चरमभागे यदा भद्राप्रवेशः तदानीमेकदेशभद्रायोगिनो दिवसस्य न द्वतात्वादशात्तस्य भद्राप्रवेशात्प्रागेव भोजने प्राप्ते सत्यभुक्ते नैव पू
जादेरनुष्ठेयत्वात्॰ भद्रारहितेपि काले तत्पूजादिकं न विरुध्यते॰ यदा तु भद्राया अंते भुक्ते तदा कर्मकालव्याप्तिशास्त्राद्भद्रोपेतकाल एव तत्पूजादिकं कर्तव्यम्॰ पक्षद्वयेपि
भद्रायुक्तघटिकासु न किंचिद्भक्षयेत्॰ तावतैव भद्रोपवासः पूर्यते॰ बवादिकरणेषु कस्यापि विशेषस्य शास्त्रेणानुक्तत्वाद्भद्रायां कृतस्य न्यायस्यातिक्रमे कारणाभावाद्या
यमेव निर्णयप्रकारः सर्वोपि योजनीयः॥ नन्वातिथिनक्षत्रकरणानां × योग × पंचांगांतःपातिनां निर्णयं कृत्वा तदंतःपातीशास्त्रीयकर्मोपयोगी वारः कुत उपेक्ष्य
त इति शंकनीयम्॰ अहोरात्रपरिमितत्वेन वारे संदेहाभावात्॥१११॥ तदाह वारेष्विति॰ तदेवं नक्षत्रयोगकरणानि निर्णीतानि॥ ५॥ २२

अथ संक्रांतिर्निर्णीयते॥ तत्र संक्रांतिर्नाम मेषादिद्वादशराशिषु क्रमेण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणं तत्र च होमस्नानादिकं विहितं॰ तस्य च सूक्ष्मका
ले अनुष्ठानासंभवात्कदानुष्ठानमित्यत आह॥ आसंनेति॰ तदाह देवलः॥ संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः॥ तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रता इति॰ एवं च सं
क्रांतेः पूर्वं त्रिंशत् ऊर्ध्वं च त्रिंशत् घटिकाः पुण्या इति सामान्यत उत्सर्गः॥ तत्रापि संक्रांतिसमीपनाड्यः पुण्यतमा इत्यर्थः॥ यायाः संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता इति
वचनात्॥११२॥ तत्र विशेषमाह॥ चरेष्विति॰ मेषादिद्वादशराशिषु चत्वारि त्रिकाणि॰ तत्रैकैकस्मिंस्त्रिके क्रमेण चरस्थिरद्विःस्वभावसंज्ञा॰ तथा च मेषकर्कतुलामकराख्या

आसन्ननाड्यः संक्रांतेः पुण्याः स्नानादिकर्मसु॥११२॥ चरेषु कर्कटे पूर्वा मकरे विंशतिः पराः॥ वर्तमाने तुलामेषे नाड्यस्तूभयतो द
श॥११३॥ वृषभादौ स्थिरे पुण्याः प्राक्पश्चादपि षोडश॥ मिथुनादौ द्विःस्वभावे उत्तराः षष्टिनाडिकाः॥११४॥ अह्नः संक्रमणे रात्रा
वनुष्ठाननिषेधतः॥ उक्तौ कालौ व्यवस्था स्यात्तद्बलात्पूर्वपश्चिमौ॥११५॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥

चत्वारश्चराः॥ तेषु मध्ये कर्कटे पूर्वाः विंशतिर्नाड्यः पुण्याः मकरे च विंशतिर्नाड्यः पराः पुण्याः॥ तुलामेषयोस्तु वर्तमाने संक्रममाणे रवौ उभयतः पराः पूर्वाश्च दश नाड्य
इत्यर्थः॥११३॥ वृषभादाविति॰ वृषसिंहवृश्चिककुंभेषु स्थिरसंज्ञेषु संक्रमणे प्राक्पश्चाच्च षोडशनाड्यः पुण्या इत्यर्थः॥ मिथुनादाविति॰ मिथुनकन्याधनुर्मीना इति
द्विःस्वभावसंज्ञा॰ षडशीतिमुखसंज्ञा च॰ तत्रोत्तराः षष्टिनाडिकाः पुण्या इत्यर्थः॥११४॥ इदं च अहःसंक्रमणविषयमित्याह॰ अह्न इति॰ तत्र हेतुमाह॰ रात्राविति॰ रा
त्रौ स्नानादिकीर्तितमिति मनुवचनाद्रात्रिसंक्रमणे दिवा स्नानाद्यनुष्ठानविधानाच्चेति भावः॥ उक्तौ कालौ पूर्वपश्चिमौ तद्बलान्निषेधानुसारेण व्यवस्थापनीयावित्यर्थः॥ तथा चास्त
मयप्रत्यासन्ने दिवासंक्रमणे सति प्रशस्ततमप्युत्तरकालं त्यक्त्वा पूर्वकाल एव ग्राह्यः॥ एवं सूर्योदयोत्तरमेव संक्रमणे प्रशस्ततमपि पूर्वकालं त्यक्त्वा उत्तरकाल एव ग्राह्यः॥ अत्रा
यं वचनमाह वृद्धवसिष्ठः॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने॥ त्रिंशत्कर्कटे नाड्यो मकरे विंशतिः स्मृता इति॰ उदगयनातीतं सत्पुण्यं भवति॰ दक्षिणायनमनागतं पुण्यं विं
शतिरित्यनेन त्रिंशन्नाड्यः पवित्रता इत्युत्सर्गस्य मकरे अपवादः॥ बृहस्पतिरपि॰ वर्तमाने तुलामेषे नाड्यस्तूभयतो दशेति॰ षडशीतिविषये वृद्धवसिष्ठः॥ षडशीत्यामतीतायां
षष्टिरुक्तास्तु नाडिका इति॰ विष्णुपदे सरवाह॰ पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडशेति॰ वृषवृश्चिककुंभेषु सिंहे चैव यदा रविः॥ एतद्विष्णुपदं नाम विषुवादधिकं फलमिति वचनेन अत्रान्तं च विष्णुपदं॥ विषुवमिति तुलामेषयोः संज्ञा॰ वृद्धवसिष्ठः॥

तत्रव्यवस्थाह॰ अर्द्धरात्रादिति॰ अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया॰ ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं॰ पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः॥ प्राहुर्दिनद्वयं पुण्यमुक्त्वा मकरकर्कटौ इति वृद्ध
वसिष्ठवचनात्॰ एवं च सति॰ विष्णुपद्यां धनुर्मीनेन पुष्कर्कन्यासु वैपदा॰ पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत्॰ पूर्वाह्णे पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः॥ अपराह्णे तु पंचैव श्रौतस्मार्तेषु च
कर्मणीति वचनात् असंतप्रशस्त्यपरं द्रष्टव्यं॰ एवमयनव्यतिरिक्तेषु संक्रमणेषु रात्रिगतेषु निर्णय उक्तस्तत्पर्यदसितं मुक्त्वा मकरकर्कटाविस्तु तं तयोस्तु कथमित्याकांक्षायामाह॰ कर्कट इत्यादि॰
तथा च याज्ञवल्क्यः॥ राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु॰ स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च इति॰ सुमंतुरपि॰ रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः॥ नैमित्तिकं च कुर्वीत स्नानं दानं च

२३ अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया॥११६॥ ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं॰ पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः॥११७॥
प्राहुर्दिनद्वयं पुण्यमुक्त्वा मकरकर्कटौ॰ कर्कटे मकरे रात्रावप्याचारादनुष्ठितिः॥११८॥

रात्रिषु॰ यज्ञे विवाहे यात्रायां तथा पुस्तकवा
चने॰ दानान्येतानि शस्तानि रात्रौ देवालये तथा॰ ग्रहणे ग्रहसंक्रांतियात्रार्तिप्रसवेषु च॰ श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते इति॰ नन्वेतद्रात्रावनुष्ठानं शास्त्रांतरविरुद्धं॰ तथा च भविष्योत्तरे॰
मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः॥ प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥ कार्मुकं तु परित्यज्य सर्वसंक्रमते रविः॥ प्रदोषे वार्द्धरात्रे वा स्नानं कुर्यात्परेहनीति॰ वृद्धगार्ग्योपि॰ यदास्त
मयवेलायां मकरं याति भास्करः॥ प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनि॰ अर्द्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने॰ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति॰ मैवं॰ भविष्योत्तर
वृद्धगार्ग्यवचनेषु रात्रावनुष्ठाननिषेधस्याप्रतीतेर्दिवसानुष्ठानविधानेनैवार्थाद्रात्र्यनुष्ठानप्राप्तिवैधकल्पनेपर्यवसानात्॥ गृहीतवचनानां मानान्तर्यस्य प्राप्नोति॰ तस्माद्वा
क्यद्वयेन विकल्पप्राप्तौ तत्र देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्या॥ तदाह आचारादिति॰ तत्र वारयोगेन तत्तन्नक्षत्रयोगेन च संक्रांतीर्नामंदादिसंज्ञा विस्तरान्न दर्शिताः॥ अथ चर्म्म
नादि कृत्यमुक्तं ब्रह्मपुराणे॰ निसंध्योरयनयोस्तथा विषुवतोर्द्वयोः॥ चंद्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु॰ अहोरात्रोषितः स्नानमर्घ्यं दानं तथा जपं॰ यः करोति प्रसन्नात्मा तस्य
स्यादक्षयं च तत्॰ संक्रांतिभ्यः पूर्वदशदश दिने मेषायनमित्यादिना मांसं वर्जितमयनं भवति॰ तत्र स्नानादिषु पुण्यकालमाह जाबालिः॥ संक्रांतिषु यथा दक्षिणास्तदीये पु अयने तथा॰ अय २३
ने विंशतिः पूर्वा मकरे विंशतिः परा इति संक्रांतिषु पादशः पुण्यकाल उक्तस्तत्र दीयायने पि सप्त वसेयथा मकरायने पूर्वा विंशतिः॥ मकरसंक्रांतौ तु परा विंशतिरिति विशेषदर्श
र्पीः॥ इति संक्रांतिनिर्णयः॥ ॥

अथ ग्रहणं निर्णीयते॰ तत्र तत्स्वरूपं दर्शयति॰ पूर्णिमेत्यादिना॰ पूर्णिमाप्रतिपत्संधौ चंद्रं ग्रसते॰ पर्वणो दर्शस्य प्रतिपदश्चांतरे अर्कं च ग्रसते तदुक्तं वृद्धगार्ग्यैः॥
पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं॰ ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरे इति॰ तत्र कदा किं कार्यमित्येतदाह॥ ग्रस्यमान इति॰ ग्रासारंभ इत्यर्थः॥ इदं शमेव स्मृत्यंत
रवचनमनुमानं॰ होमदानव च देवार्चनमपि कार्यम्॰ तदुक्तं ब्रह्मवैवर्ते॰ स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनं इति॰ एवं श्राद्धमप्याह॰ मार्कंडेयः॥ वसिष्ठश्च ब्राह्मणेषु
सेस्सूर्येंदुग्रहणे दिने॰ जन्मर्क्षग्रहपीडासु श्राद्धं कुर्यात्तथैव चेति॰ तच्चामेन हेम्ना वा॰ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॰ आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वे

पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं॰ ग्रसते चंद्रमर्कं च पर्वप्रतिपदंतरे॥११९॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते॰॥
मुच्यमाने भवे[illegible]नं मुक्ते स्नानं विधीयते॥१२०॥

शातातपवचनात्॰ आशौचेपि ग्रहणे स्नानादि कार्यं॰ तथा च वृद्धवसिष्ठः॥ सूतके मृ
कर्म तके चैव न दोषो राहुदर्शने॰ तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते इति॰ तथा॰ स्मार्तं परित्यागो राहोरन्यत्र सूतकेइति वचनात् सकलस्मार्तकर्म भवति॰ यत्तु ग्रहणनिमित्तमाशौ
चं तत्स्नानेन निवर्तते॰ ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतं॰ तयोः संपत्तिमात्रेण उपस्पृश्य क्रियाक्रम इति॰ उपस्पृश्य स्नात्वा॰ षट्त्रिंशन्मतेपि॰ सर्वेषामेव वर्णानां सूतकं रा
हुदर्शने॰ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति॰ शृतमन्नं ग्रहणांतरितं पक्वमन्नं॰ तच्च केषुचित्प्रतिप्रसवः॥ आरनालं तथा क्षीरं कीलाटं घृतसक्तवः॥ स्नेहपक्वं च तैलं च
न कदाचित्प्रदुष्यतीति॰ तथा आरनालं च तक्रं च ग्राह्यं यं घृतपाचितं॰ उदकं च कुशस्पृष्टं न तु दुष्येद्राहुदर्शने इति वचनात्॰ ग्रहणे भोजनव्यवस्थामाह मनुः॥ चंद्रसूर्यग्रहे ना
द्यादद्यात्स्नात्वा विमुक्तयोः॥ अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेहनीति॰ स्पर्शमारभ्य मोक्षपर्यंतो ग्रहणकालः॥ तत्र न भुंजीत॰ किंतु मुक्तयोः स ततः पश्चात् स्नात्वा भुंजीत॰ यदा
तु ग्रस्तास्तमयस्तदा परेद्युस्तौ मुक्तौ बिंबौ दृष्ट्वा भुंजीतेत्यर्थः॥ न केवलं ग्रहणकाल एवाभोजनं किंतु प्रागपि तदाह व्यासः॥ नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात्॰ ग्रहकाले च
नाश्नीयात्स्नात्वाश्नीयाद्विमुक्तयोरिति॰ पूर्वकाले भोजननिषेधे विशेषमाह॰ वृद्धवसिष्ठः॥ ग्रहणं तु भवेदिंदोः प्रथमादधियामतः॥ भुंजीतावर्तनात्पूर्वं पश्चिमे प्रथमादधः॥ रवेस्त्र
यर्तनात्पूर्वमर्वागेव निशीयतः॥ चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरादधः इति॰ रात्रौ प्रथमयामादूर्ध्वं चंद्रग्रहणं चेदावर्तनात् मध्याह्नात्पूर्वं भुंजीत॰ रात्रिपश्चिमयामे चेद्रात्रौ प्रथम
यामादर्वाक् भुंजीत॰ अह्नः चतुर्थप्रहरे रविग्रहणं चेत्पूर्वरात्रेश्चतुर्थप्रहरादधो भुंजीतेत्यर्थः॥ चन्द्रग्रहणे ग्रहणयामात्पूर्वं यामत्रयं भोजननिषेधः॥ सूर्यग्रहे तु यामचतुष्टयमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिनात्स पीर्य॥ तथा च वृद्धगौतमः॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम्० चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विनेति॥१२०॥ तदाह० सूर्यग्रहे त्विति० बालादिविषये
त्याह॥ अपराह्ण इत्यादि० एवमेव वत्सवचनं० समर्थस्य निषिद्धकालभोजने प्रायश्चित्तमुक्तं॥ कात्यायनेन० सूर्यचंद्रग्रहे भुक्त्वा प्राजापत्येन शुध्यति० तस्मिन्नेव दिने भु
क्त्वा त्रिरात्रेणैव शुध्यतीति० चंद्रग्रस्तोदये विशेषमाह वृद्धवसिष्ठः॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति॥१२२॥ तदाह ग्रस्तोदय इति० ग्रस्तास्तमये विशेषमाह॥ भृगुः॥ ग्रस्ता
वेवास्तमानं तु रवींदू प्राप्नुतो यदि० तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नर इति॥१२३॥ ग्रस्ताव इति० पापक्षयकामस्य ग्रहणदिने उपवासोऽप्युक्तो दक्षेण० अयने विषुवे चैव ग्रहणे चंद्रसू

२४ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं॥ चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना॥१२१॥ सायाह्ने ह्युपरागे तु नापराह्णे भुंजीत क्रि
पा॥ अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे॥१२२॥ भुंजीत संगवे चेत्स्यान्न पूर्वं भुजिमाचरेत्० ग्रस्तोदये विधोः पूर्वं नाहर्भोजि
नमाचरेत्॥१२३॥ ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि॥ तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः॥१२४॥ त्रयोदश्या
दितो वर्ज्यं दिनानां नवकं ध्रुवं॥ मंगलेषु च सर्वेषु ग्रहणे चंद्रसूर्ययोः॥१२५॥ द्वादश्यादित्रतीयांतो वेधः इंदुग्रहे स्मृतः॥
धः एकादश्यादितः सौरे चतुर्थ्यंतः प्रकीर्तितः॥१२६॥ खंडग्रहे तयोः प्रोक्तमुभयत्र दिनद्वयम्० नित्यनैमित्तिके जप्ये हो
मयज्ञक्रियासु च॥१२७॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते॥ तमेव निर्णयं शास्त्रेऽन्यायाभ्यां कर्तुमुद्यतः॥
॥१२८॥ इति श्रीमाधवाचार्यकृतः संक्षेपतः कालनिर्णयः समाप्तः॥ ५॥ ॥ ॥ २५

र्ययोः॥ अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यत इति० पुत्रवतो विशेषमाह नारदः॥ संक्रांत्यामुपवासं च कृष्णैकादशिवासरे० चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृहीति० वारवि
शेषयोगे फलातिशयमाह व्यासः॥ रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा० चूडामणिरिति ख्यातस्तत्र दत्तमनंतकं॥ व्यासः॥ सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः॥ सर्वं भूमिस
मं दानं ग्रहणे चंद्रसूर्ययोरिति० ग्रहणे पूर्वापरदिनेषु विवाहादिवर्जनं स्मृत्यंतरोक्तं तद्दर्शयति॥ त्रयोदश्यादित इति॥१२५॥१२६॥ एतदपवादं दर्शयति० नित्यनैमित्तिकेति॥
॥१२७॥१२८॥ इति श्रीमत्सर्वधर्मशास्त्रपारावारीण तत्सुत रामचंद्रात्मजभट्टवैद्यनाथसूरिकृते कालमाधवीयकारिकाव्याख्याने पंचमप्रकरणं॥ श्रीरस्तु॥ संवत् १८८४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.08.19 12:30
,TRANSFERRED=2019/08/02 at 12:37:32
,PAGES=25
,TYPE=STD
,NAME=S0001250
,Book Name=M-33-KAL NIRNAY BAIDHNATH BHATT LIPIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection